Shri Raghunath Temple MSS. Library,
JAMMU

No. २०६३ — २०६४
क. ख.

Title क. परमार्थसार संग्रह कारिका
ख. आत्मबोधोपनिषत्.

Author क. राजानक: अभिनव.
ख. ×

Extent ५१ Age

Subject भक्तिशास्त्रं - उपनिषत्

क परमार्थसारसंग्रहकारिकाः पूर्णाद्वयमयीविवृत्तिसहिताः

ख आत्मोपनिषत् २ ५२

२०६३
२०६४

ॐ प॰ टी॰ १

ॐ श्रीशिवाय नमः ॐ नमः सरस्वत्यै ॐ चिद्घनोपि जगन्मूर्त्या प्रपंचितो यः प्रजयत्यजः स्वात्मप्रच्छादनक्री।
डाविदग्धः परमेश्वरः योगिंद्राधायिगुरुणाग्रहतया परमार्थसारसंक्षेपः विवृतिं करोमि लक्ष्मीमस्मि
न्विद्वज्जनार्थितो योगः इह शिवाद्वयशासने देहादिप्रमातृता प्राधान्यं संकल्पमन्यस्य शंकातंका
लस्य संध्यायादिरूपविघ्नोपसंस्पृष्टं सर्वविकाशस्त्वनिष्पत्तिमन्यमानः परिमितप्रमातृताधर्मादि
कारेण चिदानंदैकघनस्वात्मदेवतासमाविशशालिनीं समस्तशास्त्रार्थसंक्षेपगर्भं प्रथमतस्ता
वत्परमेश्वरप्रवणतां प्रदर्शयति ॥ ॐ परं परस्थं गहनादनादिमेकं निविष्टं बहुधा गुहासु सर्वा।
लयं सर्वचराचरस्थं त्वामेव शंभुं शरणं प्रपद्ये ॥१॥ तं सर्वप्रमातृस्फुरत्तासारस्वात्मदेवतारूपमेव श
म्भुमनुत्तमस्थेयः स्वभावं सत्तात्मकं शरणं त्राणं तत्समावेशसमापत्तये संश्रये एवकारः शंभुस्वात्मदेवता।
कारमेव प्रपद्ये न पुनर्मायातस्थानुलिंगकं किंचिद्भिन्नं देवमित्यन्ययोगव्यवच्छिनत्ति अन्यच्च किंभूतं परं पूर्णं चि
दानंदेच्छाज्ञानक्रियाशक्तिनिर्भरमनुत्तरस्वरूपं तथा परस्थं गहनादिति गहनान्मायाभिधानात्तत्वात्प
रस्मिन्सर्वाण्येव शिवादिविघातत्वपर्यंतं प्रभ्रुद्धाधनिरावृत्ये तिष्ठंतं न पुनस्तत्तदवस्थावैचित्र्येणापि स्फुरतस्त

प्रमातृप्रमेयरूपजगतो विश्रान्तिस्थ

जडाजडविश्वरूपतया तिष्ठंतं

१

तस्माप्रच्यवः तदुक्तमित्यन्यादर्शे

स्फुरति सति

ततः परस्मात् पूर्णात् तत्त्वरूपात् न स्वप्रच्यावो भवति । यदुक्तं जाग्रदादिविभेदेऽपि तदभिन्ने प्रसर्पति । निवर्तते निजान्नैव स्व-
रूपादुपलब्धृतेति स्पन्दशास्त्रे । अनादिरूपाणां सर्वप्रतीतीनाम् अनुभवितृतया प्रमातृत्वेनादिसिद्धत्वात् । एकमित्य-
स्माकं चिदेकेन स्फुरणात् भेदस्यानुपपत्तेः । तथा निविष्टमित्यादि एवंजातीयमपि स्वस्वातन्त्र्येण बहुधा नानाप्र-
कारैर्भेदैर्गुहाग्रहनक्षत्रेत्रक्षेत्ररूपाहं हुंकारुरूपांस्तं तराविष्टं चैतन्यरूपोऽपि स्वयं जडाजडात्मतामाभास्यन्नवस्थानात् प्रमा-
तृतया स्थित इति यावत् । अत एव सर्वालयमिति सर्वस्य रुद्रक्षेत्रज्ञादिप्रमातृप्रमेयरूपस्य जगत आलयं विश्रान्ति-
स्थानं सर्वमिदं किल पूर्णप्रमातरि स्थितं सकलाह्य ग्राहकयुगलापेक्षया उन्मग्नमिव भेदेन प्रकाशमानं नानारू-
पैर्व्यपदिश्यते । अन्यथैतत्प्रकाशाद्भिन्नस्य सत्त्वैव न स्यात् । अतः इदं विश्वमिति सर्वनामप्रत्यवमर्शः । नैतावता भग-
वतः सर्वसमुत्तीर्णं स्वरूपमित्याह सर्वचराचरस्थमिति । सर्वमिदं यज्जडाजडस्वभावं विश्वं तद्रूपतया तिष्ठन्तं कर्ता-
रं सर्वस्य यतः स्वयं वै विभो ततः सर्वमिदं त्वमेवेति न्यायेन हि व्यतिरिक्तस्यान्यस्याप्रकाशमानस्य कार्यत्वानु-
पपत्तेः । भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थित इति भगवानेव तथा तथा च काश्चि इत्येवं । एवंविधं त्वामनुत्त-
रं सर्वस्य स्वात्मदेवतास्वरूपं परा हन्ताचमत्कारसारमपि गृहीतनानात्मसमथचात्यन्तमखण्डितस्वस्वातन्त्र्यपरमाद्वय-
प्रकाशस्वरूपं भगवन्तं शम्भुं प्रपद्ये शरीरादिकृत्रिमाहंकारगुणीकारेणैताहृशं त्वामेव स्वात्मानं परामृशताचमत्

जगतः
= एतत्सप्र-
काशाद्भिन्न-
स्य सत्त्वादि-
र्न =

सर्वज्ञत्वसर्वकर्तृत्वादिगुणगणयुक्तानन्दप्रमातारः दत्ताद्यापि तामसोताः
घटपटादिपदार्थमात्रज्ञानयुक्ताः क्षेत्रज्ञाः प्रसिद्धा ये पशवः उच्यन्ते

ना

कारस्वरूपं समाविशामीति यावत् अनेन ग्रहणकवाक्येन परमोपादेयं स्वस्वभावसमावेशमयं इदं शास्त्रमुप
दिशता गुरुणा वक्ष्यमाणहेयोपादेयतया सकलग्रन्थार्थोपक्षेपः कृतः ॥ एवंप्रकारेण तात्पर्यमहयस्वरू
पं स्तुतिद्वारेण प्रतिपाद्येदानीं शास्त्रावतारमभिदधत्संबंधाभिधेयादिग्रन्थकृदार्याद्वयेनाह २ ॥ ॥टिके ग्रंथकारः आर्यादि तन्मादर्श
गर्भाधिवासपूर्वकमरणान्तकदुःखचक्रविभ्रान्तः आधारं भगवन्तं शिष्यः पप्रच्छ परमार्थं आधारकारि
काभिस्तं गुरुरभिभाषते स्म तत्सारं कथयत्यभिनवगुप्तः शिवशासनदृष्टियोगेन ॥ कश्चिद्भगवत्प्रसादा
त्समुत्पन्नवैराग्यः संसाराद्विरक्तमतिः गुरोः शासनीयोस्मीति मत्वा सद्गुरुमाधारं भगवन्तं शेषाख्यं मुनि
सम्यगाराध्य परमार्थोपदेशस्वरूपं पृष्टवान् तदा तद्योग्यतापरिपाकस्वरूपपरिशीलनक्रमेण तच्छिष्यं वि
गलितान्तःकरणं मत्वा सोप्यनन्तनाथो निःशेषशास्त्रोपदेशात्मकः परमार्थसारनाम्ना आधारकारिकाशीति
पराभिधानग्रन्थेन सांख्यनयोक्तोपदेशानुसारेण प्रकृतिपुरुषविवेकज्ञानात्परब्रह्मावाप्तिरित्येवं तच्छि
ष्यं प्रोक्तवान् असावेव ब्रह्मोपदेशः परमाद्वयस्वरूपस्वस्वातन्त्र्यदृष्ट्या प्रतिपादितः सन्मुक्तियुक्तो भवती
ति मत्वा सर्वजनमनुग्रहीतुं परमाद्वयशैवनययुक्त्या गुरुरभिनवेनालौकिकेन चिच्चमत्कारस्फारेण
गुप्तो गुह्यः सरहस्य इति सोयं गुप्तनामाक्षरावलिस्तत्सारं तस्य परमार्थोपदेशस्य यत्सारं दर्शनेनवनी

तमिवोपादेयं परानुग्रहरूपं हृन्नः संप्रतिपादयतीत्येवं संबंधाभिधेयाभिधानप्रयोजनादयः उपपादिताः
नेह पुनः शास्त्रगौरवभयात्प्रतन्यन्ते कीदृशः सन्निष्ठ इत्याह गर्भाधिवासेति गर्भाधिवासप्रारंभे जा।
यते स्तिष्ठति वर्धते विपरिणमते अपक्षीयते विनश्यतीति तत्तदवस्थावैचित्र्येण षड्भावविकारा नेमिषु तं यत्र
न्मरणांतदुःखरूपमाविर्भावतिरोभावात्मं सरणस्वभावं तया च क्रमिकं चक्रं तस्मिन्विश्रान्तो विपरिवृ
त्तः अनेनास्य प्राग्जातिस्मरणस्वभावो बोधाविर्भावो द्योतितः अन्यथा कथं कादाचित्कमिलक्षणं प्रश्नज्ञ
तृत्वं स्यात् एवं च यः समुत्पन्नवैराग्यः पारमेश्वरानुग्रहशक्तिविद्धहृदयः समुदितसम्यग्ज्ञानत
योपदेशपात्रतामवाप्य परमेश्वराकारं समुचितमपि गुरुं समासाद्य परमाद्वयज्ञानमभिलषते स एव वस्तु
तू पदेशभाजनं स्यादिति एतदेव चानेनोक्तं शक्तिपातवशाद्धि विनीयते सद्गुरुं प्रति इति इह च पुरस्ता
दुक्तं अधुना संहारक्रमेण पीठिकाबंधं विधाय विश्ववैचित्र्यचित्रेऽस्मिन्जगति पारमेश्वरमनुत्त
मं स्वातंत्र्यमेकमेव संयोजनवियोजनकर्तृत्वहेतुरिति तच्छक्तिविकासमेव विश्वमंडचतुष्टयमुखेनावे
दयन्नाम्यमवतारयति " "निजशक्तिवैभवभरादंडचतुष्टयमिदं विभागेन शक्तिर्माया प्रकृतिः
पृथ्वी चेति प्रभावितं प्रभुणा " " चिदानंदैकघनेन प्रभुणा स्वतंत्रेण भगवता महेश्वरेण अंडचतुष्ट।

विकारएवनेमिश्च
क्रधारा

प० वि ३

यं विश्वाछादकत्वेन कोशरूपतया वस्तुपिंडभूतमिदं यदुक्तं वस्तुपिण्डो ऽण्डमुच्यत इति प्रभावितं प्रकाशि
तं भुवनकर्तृत्वादावप्युक्तं कस्मादित्याह निजशक्तिवैभवभरादिति निजः स्वात्मीयो यो ऽसावसाधारणः इ
च्छाद्यः शक्तिप्रपञ्चस्तस्य यद्विभवं विविधं च्छिन्नः प्रसरस्तस्य यो ऽसौ भरः समुद्रेकस्तस्मादिति भगवतः किल स्वशक्तिवि
कासस्फार एव जगन्निर्माणं यदुक्तं श्रीमंगलशास्त्रे शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते शक्तयो ऽस्य
जगत्सर्वं शक्तिमांस्तु महेश्वरः इति किंरूपाण्डचतुष्टयं संख्येत्याह शक्तिरित्यादि विश्वस्य प्रमातृप्रमेयरूप
स्य पराहन्ताचमत्कारसारस्यापि स्वस्वरूपगोपनात्माख्यातिमयी निषेधव्यापाररूपा या पारमेश्वरी शक्तिः सैवा
छादकत्वेन बंधकतया शक्त्यण्डमित्युच्यते सदाशिवेश्वरविद्यातत्त्वपर्यंतदलं वक्ष्यमाणमंडत्रितयमंतः
समंतात्क्रोडीकृत्यावतिष्ठत इति कोशरूपतयैषा शक्तिरनेन शाक्तेन संज्ञितात्र स्मिन्नण्डे सदाशिवेश्वरावेवा
धिपती अन्यच्च मलत्रयस्वभावं मोहमयं भेदैकप्रवणतया सर्वप्रमातॄणां बंधरूपं पुंस्तत्त्वपर्यंतदलं माया
ख्यमंडमित्युच्यते तेन वक्ष्यमाणमंडद्वयमंतः समंतात्स्वीकृत्य स्थितं अण्डाधिपश्चात्र गहनाभिधानो रुद्रः
तथा सत्त्वरजस्तमोमयी प्रकृतिः कार्यकारणात्मना परिणामसतीय पुंप्रमातॄणां भोगरूपतया स्वखड्गः स्वभो
ग्यरूपतया बंधयित्री प्रकृत्यभिधानमंडमित्युच्यते तत्रापि महाविभूतिर्भगवान्विष्णुर्भेदप्रधानो ऽण्डाधिप

भरस्तस्य दर्भ

यश्चास्यन्याद शौ

न४

स्वयम्

शक्त्यण्डशाक्तेन=

प्रकृत्यण्ड पृथ्व्यण्डम्

३

ब्रह्मप्रजापतीन्द्राणां पितृगन्धर्वयोस्तथा यक्षरक्षःपिशाचानां सर्गो दैवोऽष्टधा स्मृतः १
पशुमृगपक्षिसरीसृपस्थावरभेदतः तैर्यग्योनः पञ्चविधः सर्गो मानुष्य एकधा २ ३ २

तिः तथाष्टधैव मनुष्यस्थावरान्तानां प्रतिशाकारूपतया स्थूलकञ्चुकमयी बंधयित्री ति कृत्वा पृथ्व्यंड
मुच्यते तत्रापि चतुर्दशविधभूतसर्गप्रधानतयांडाधिपो भगवान् ब्रह्मेत्येवं परमेश्वरविजृंभितमिदमंड-
चतुष्टयं भगवतैव प्रकाशितं परिस्फुरति एवमेतदेवांडचतुष्टयं प्रतिपाद्यात्रैव भोग्यभोक्तृत्वप्रतिपाद
नपरतया विश्वस्वरूपनिरूपणाय कारिकामाह " "तत्रान्तर्विश्वमिदं विचित्रतनुकरणभुवनसंतानं
भोक्ता च तत्र देही शिव एव गृहीतपशुभावः " "तत्र तेषु चतुर्ष्वंडेष्वागमप्रसिद्धेषु विश्वमिदमंतर्मध्ये
वर्तते कीदृशमित्याह विचित्रेति रुद्रक्षेत्रज्ञभेदभिन्ना नानामुखहस्तपादादिरचनारूपास्तनवश्चाका
राविशिष्टसंस्थानरूपेणाश्चर्यभूतास्तथान्योन्यभेदेन सातिशयानि करणानि चक्षुरादीनि तथा रुद्र
मातॄणां निरतिशयानि सर्वज्ञत्वादिगुणगणयुक्तानि तैः किल सर्वमिदमेकस्मिन्नेव युगपज्ज्ञायते संपाद्य
ते च क्षेत्रज्ञानां पुनरेतान्येव करणानि पारमेश्वरनियतिशक्तिनियंत्रितानि संनिहितघटादिपदार्थमात्रज्ञान
करणसमर्थान्येव न तैः सर्वं ज्ञायते नापि क्रियते तत्रापि योगिनामतिशयः करणानां यन्नियतिसमु-
ल्लंघनात्तदीयैः करणैर्दूरव्यवहितविप्रकृष्टमपि परिच्छिद्यते परप्रमातृगतं च सुखदुःखादि ज्ञायते ए
वं च तिरश्चामपि नियतिशक्त्यासंकुचितानामपि मनुष्येभ्योऽप्यतिशयः करणानां विद्यते तद्यथा गावः

ए

शक्तिः ३

एवं च इत्यन्यादर्शे

प॰
सा॰
ह्राद भूपिर्गतारःस्था
दृत्यन्वादर्शे

स्पष्टं ह्यवहितमपि पश्यंति अश्वा रात्रावपि मार्गमीक्षंते गृध्रा योजनशतगतमप्यामिषमवलोकयंति पत्ति
णो मक्षिकामशकपर्यंता आकाशविहारिणो दृश्यंते सरीसृपा उरसा पंथानं यांति दृश्याश्च स्पृश एवं तिशाखूं उ
ष्णा ह्रदादपि गर्ताच्छ्वासमात्रेण सर्पमाकर्षयंति इत्येवं सर्वत्र करणवैचित्र्यमूह्यं तथा भुवनान्यप्यागमप्र
सिद्धानि वर्त्तुलत्र्यश्रचतुरस्रार्धचंद्रवृत्ताकारतया सातिशयसंस्थानानि इत्येवं विचित्रो नानातिशयाद्भु
तस्वभावः एषां तनुकरणभुवनानां संतानः अविरतप्रबंधप्रवाहो यस्मिन्विश्वस्मिंस्तदेवंविधं विश्वं ए
वंविधे चात्र भोग्यस्वभावे विश्वस्मिन्भोक्त्राभाव्यमित्याह भोक्ता च तत्र देहीति मलत्रयाच्छादितो देहो भोगायतनं
विद्यते यस्य प्राणिनः स देही सुखदुःखादिस्वभावः शारीरी सुखदुःखादिमये यस्मिन्भोक्ता सुखदुःखाद्यनुभविता
यस्तु प्रमातेति कथ्यते ननु च परप्रमात्रपेक्षया अणुमात्रस्यापि न भेदो विद्यते अतस्तद्व्यतिरिक्तो देही नाम वरा
कः यदुक्तं प्रदेशोपि ब्रह्मणः सार्वरूप्यानतिक्रांतश्चाविकल्प्यश्चेति एकैकत्र च तत्त्वेपि षट्त्रिंशत्तत्त्वरूपते
ति न्यायेनैक एव स्वशक्तियुक्तो महाप्रकाशवपुरेव परमेश्वरः प्रमाता सर्वतो भिन्न एवावभासते तत्को भिन्नस्या
प्रकाशमानस्य देहिनोस्तित्वाभ्युपगमेपि प्रकाशमानत्वानुपपत्तेर्न सत्ता निश्चीयते प्रकाशते चेत्तस्मिन्पर
ब्रह्मात्मनि तर्हि प्रकाशाभिन्न एवैकः प्रमातेति पुनरपि किं परत्वेनायं भोग्यभोक्तृलक्षणः संभेद इति सर्वे

अख्यातिर्यदि न ख्यातिः ख्यातिरेवावशिष्यते ख्याति चेत्ख्यातिरूपत्वात् ख्यातिरेवावशिष्यते
इत्यनेनैव आशयेन स्पन्दशास्त्रे यस्मात्सर्वमयो जीवः इत्युपक्रम्य तेन शब्दार्थचिंतासु न सावस्था न यः शिवः इत्यादिना शिवजीवयोरभेद एवोक्तः एतत्तत्त्व
परिज्ञानं जीवन्मुक्तिः एतत्तत्त्वापरिज्ञानमेव च बंधः इति प्रत्यभिज्ञाहृदये ॥
यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः तथा हृदयबीजस्थं जगदेतच्चराचरं

समर्थयमान आह शिव एव गृहीतपशुभाव इति यो ऽयं भगवान् समनंतरं प्रतिपादितश्चिदानंदैकघनः स्वा
तंत्र्यस्वभावः शिवः स एव स्वरूपगोपनात्मतत्त्वः संक्षिप्तज्ञानरूपदेहप्रमातृभूमिकां समापन्नः पाल्यत्वा
त्पशुत्वात्पशुसमतालक्षणं सुखदुःखमये स्वयं निर्मिते ऽस्मिन् भोग्ये भोक्ता देही इति कथ्यते न पुनः शिवव्य
तिरिक्तं किंचित्पदार्थजातमस्ति एष एव च भगवान् शिवः स्वातंत्र्यात् भोक्तृभोग्यलक्षणं प्रमातृप्रमेययुग
लकं क्रीडनकमिव समुत्थापयति यदपेक्षयायं भेदप्रधानो व्यवहारः तस्मादेतदेव तत्परमेश्वरस्य स्वात
त्र्यं निरतिशयं यत्स्वरूपतापरित्यागेन भोक्तृभोग्यस्वभावं पशुभावमापन्नोपि सर्वप्रमातृत्वेन अनुभ
वितृतया स्वात्मनि प्रस्फुरंश्चिदानंदैकघनः शिव एव" एवमप्येकश्चैतन्यस्वभावः प्रमाता मायादिमायी
यप्रमातृप्रमेयवैचित्र्येण नानात्वादनेक इति कथं विरुद्धयैकतया व्यवह्रियते एकस्य कि मिति नानारू
प इति छायातपवद्विरोधाद्विरुद्धधर्माध्यासः समापततीति न पुनरेकानेकरूप एकस्य पदार्थः स्यात् एतत्त
त्रयमेव भेदो भेदहेतुर्भावानां यद्विरुद्धधर्माध्यासः कारणभेदो वेति लौकिकमत्र दृष्टांतं प्रदर्शयन् [illegible] इति
केचिद्यत्तत्समर्थयते" "नानाविधवर्णानां रूपं धत्ते यथामलः स्फटिकः सुरमानुषपशुपादपरूप
त्वं तद्वदीशोपि" "यथैकोपि स्फटिकमणिस्तत्तल्लाक्षानीलाद्युपाधिसम्पर्कवशात् वैचित्र्येण तत्तद्वैचित्र्यमा

प. सा. वि. ५

त्मनि धारयंस्तथा विचित्रो भवति । न पुनस्तस्य स्फटिकताहानिरेतावता सम्पद्यते एतदेव स्फटिकम
णेर्मणित्वं यत्तत्तद्विशेषेणानुरञ्जितेऽपि तस्मिन् स्फटिकमणिरयमित्यबाधिता सर्वस्य सर्वदैव प्रतीतिः केव
लमत्रासौ लाक्षादयः स्फुरन्तीति व्यवह्रियते न पुनर्लाक्षाद्युपाधिः पटमिव तं विशिनष्टि येन स्वरूपवि
प्रलोपोऽस्य स्यात् तस्मादेतदेवामलत्वं मणेर्यदुपाधिरूपानाकारान्निभर्त्ति स्वस्वरूपतया च प्रथते तथै
वायमीश्वरः स्वतन्त्रश्चिदानन्दैकघन एककोऽपि स्वच्छे स्वात्मदर्पणे देवमनुष्यपशुपक्षिस्थावरादीनां नारू
ढत्वेऽप्यज्ञातादिपदार्थरूपाणां विशेषाणां स्वयं निर्मितानां च रूपं तं वर्णविचित्रं स्फटिकमणिवत् स्वात्माभेदे
न धारयंस्ततोऽपि समुत्तीर्णत्वादहमित्येवमखण्डचमत्कारेण पूर्णाहितं नानारूपमप्येकं स्वात्मानं प्रत्यवमृ
शति इत्यमुष्यैकतासौ खण्डनामयो भिन्नरूपो देशः कालो वा न कश्चित् विद्यते यद्यपि त्वयैतस्य स्वात्मम
हेश्वरस्याविरुद्धधर्माध्यासादिदूषणानुद्बोतापि साक्षात्कारलक्षणं चित्रज्ञानं नानाभेदं सम्भिन्नमपि परे
रप्येवमेवैतदभ्युपगतं यथा नीलादिश्चित्रविज्ञाने ज्ञानोपाधिरनन्यभाक् अशक्यदर्शनस्तं हि पतन्त्य
र्थे विशेषयन्तीति प्रमाणवार्तिके किं पुनः सर्वतः पूर्णस्य ज्ञानस्य चिदेकवपुषः स्वतन्त्रस्य यावि मादेश
कालाभेदकतयाभिमतो मूर्तिवैचित्र्यक्रियावैचित्र्याभ्यां यस्य समुल्लासकतया स्थितौ कथं तस्यैव भग

वेचयन्

दोषं विशेषप ... नतिकिंतर्ह्य ५ मेद

ज्ञानं विना नान्यं विषयतयाभजति = ७

... कालकर्मक समुल्लासकृत्तानतया = ८

वतोऽव्यवच्छेदकोऽस्यातां यदि नाम देशकालयोः कदाचित्संविदो भेदेन स्थितिरभविष्यत्तदा तत्कृतोऽपि वि
रुद्धधर्माध्यास उदपत्स्यत इति तत्र संभावना स्यात् यावता तयोः संवित्प्रकाशेनैव स्वात्मसत्तासि
द्धिरिति सिद्ध एवानेकस्वभावोऽप्येक एव महेश्वरश्चिन्मूर्तिः भेदवादे पुनर्विरुद्धधर्माध्यासो दुरुद्धर ए
वेति ॥ नन्वेक एव संवित्तत्त्वः प्रमाताभ्युपगतः तनुकरणभुवनतां समापन्नः सन्स एवानेकतां या
त इति चेत्तर्हि तन्वादिविनाशे स एव विनष्टः स्यात् तत्समुत्पत्तौ वा एष एव तदोत्पद्येत एवं प्रतिप्रमा
तृनिपातः स एव जायतेऽस्तीति षोढा भावविकारतया व्यवच्छिद्येत पुण्यपापस्वभावकर्मवैचित्र्येण च
तस्यैव भगवतः स्वर्गनरकादिभोगः प्राप्त इति कथमुच्यते स्वस्वरूप एव शिव इति दृष्टान्तद्वारेण तदपि स
मर्थयते ॥ ॥ गच्छति गच्छति जलमिव हिमकरबिंबं स्थिते स्थितिं याति तनुकरणभुवनवर्गस्तथा
यमात्मा महेशानः ॥ ३ ॥ यथा जलप्रवाहे याति सति हिमकरबिंबं चंद्रवपुर्वस्तुवृत्तेनाकाशम
स्थं स्वयमचलमात्मकं जलप्रवाहान्तः प्रतिबिंबितमपि गच्छतीव यातीव तथैव तस्मिन्नेव क्षणे तत्र
जलाशये निस्तिमिते सति तदेव हिमकरबिंबं स्थितिं गच्छतीवेत्युभयथा सर्वप्रमातृभिरेतत्संभा
व्यते न पुनः परमार्थेन तत्तथैव स्यात् नापि जलगतौ देशकालौ भेदकौ तया चंद्रमसः स्वरूपं गगनस्थ

संविदो देशभेदेन स्थिति
रभविष्यत्तदा तत्कृतो
ऽपि द्रव्यान्यादृशी

प॰सा
वि॰
६

6

परामृशन्तः केवलं जलमेव तावद्दृश्यं अथ च तत्प्रतिबिंबितस्य चंद्रबिंबस्य जलगतचलनादिको
भेदो व्यवह्रियते इति एवं तावत् गंगाजलगतस्य कर्दमपतितस्य वावभासितः स्वस्वरूपतया न काचि
त्क्षतिः तथैवायमात्मा चैतन्यस्वभावः स्वयं निर्मिततनुकरणभुवनवर्गे परिक्षीणे सति समुत्पन्ने वा
प्रक्षीणः समुत्पन्नश्चेति मायाव्यामोहितानां व्यवहारमात्रमेतत् जलगतचंद्रवत् न पुनः स्वात्मा जाय
ते म्रियते वेति गीतास्वपि देवोक्तं न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः अजो नित्यः
शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे इति तस्मादयमात्मा महेशानः स्वतंत्रः सर्वस्यात्म प्रत्य
वमर्शस्वभावः सर्वप्रमातॄणामनुभवितृतया प्रथमानः सन् तत्तदवस्थाविप्रलोपे समुत्पन्नो वा स्वस्व
रूप एव एतदेव च दुर्घटकारि महेशानत्वं संविन्मयस्य यत्तथा तथा पशुप्रमातृतया स्वर्गनिरयादिभोग
भोक्तापि सर्वानुभवितृतया संवित्स्वरूप एव प्रस्तुतपुण्यपापस्वर्गनरकक्षुत्पिपासादिको यो यं पशुभा
वो बंधकतयाभिमतः स यदि भगवता स्वात्मप्रकाशेन प्रकाशितः परामृष्टश्च स्यात् तदा यथोक्तां स्वात्मा
निसत्तां लभते अन्यथा निःस्वभाव एवैष इति कथं स्वात्मनस्तस्यैवं महेश्वरस्य स्वरूपविप्रलोपो योच्छे
ते सर्वथा निर्मितमेव वस्तु संहार्यं समुत्पाद्यं वा देहादिरूपं स्यात् न पुनर्नित्यो भगवांश्चैतन्यो समुत्पा।

स कि॰

६

त्तिविनाशोकदाचिद्भवेत्तां तस्मादेकएवस्वात्माग्राह्यग्राहकतयानानारूपस्वभावः सन्पुनरपिसर्वात्त
भवितनयासर्वस्यैकतयाप्रथतेइतिनकाचिदद्वयवादक्षतिः" "इत्ययमपिसर्वेषामयंस्वात्माविश्वप्र
पंचस्वभावः एकस्संविन्मात्रपरमार्थः सर्वावासः सर्वत्रसंविदनुगमादितियुक्त्यागमाभ्यांप्रतिपादितश्चेत्त
किमितिलोष्टादावप्यविशेषात्स्वात्मतयासनप्रतीयतेअभ्युपगमेपिवाजडाजडव्यवस्थेयंभासमानान
संगच्छतेलोकव्यवहारश्चजडाजडरूपइतिकथमेतत्स्यादित्याह" "राहुरदृश्योपियथाशशिबिंबस्थ
प्रकाशतेतद्वत् सर्वगतोप्ययमात्माविषयाश्रयणेनधीमुकुरे" "आकाशदेशेसर्वत्रराहुः परिभ्र
मन्नोपलभ्यतेसएवपुनर्ग्रहोपरागकालेचंद्रमूर्तिस्थः प्रथमानः अयंराहुरितिपरीक्ष्यते अन्यथास्थि
तोपिभचक्रेस्थितएव तथैवेहापिसर्वान्तरतमत्वेनस्थितोप्ययमात्मास्वानुभवैकरूपतयाप्रत्यक्ष
परिदृश्यमानः सर्वस्यतथानोपलक्ष्यते यदापुनः सूर्यष्टकप्रमातृणांबुद्धिदर्पणेप्रतिभामुकुरेया
ह्यावस्थाकालेघटादिविषयस्वीकारेणस्फुरामीत्येवमहंप्रतीतिविषयोभवति तदाग्राहकस्वभा
वतयालोष्टादावपिस्थितः सन्स्फुटरूपस्तत्रैवस्वात्माप्रकाशते सर्वेषुस्वानुभवैकरूपः प्रतीयतेलो
ष्टादावप्यततमोमयत्वात्स्थितोप्यस्थितकल्पोसौप्रथते राहुराकाशेयथा एवमयंभगवानमायाप्र

पीमङ्करे =

त्वात्सांगकल्पेपि भाववर्गं कांश्चित्तुर्यष्टकस्वरूपान्वेषखंडानप्यहंतारव्यवस्थारसाभिषिक्तान्वेदकी
करोति कांश्चिद्वेद्यीकरोति यदपेक्षया यं जडाजडव्यवस्थास्वभावो भेदव्यवहारः सुस्थित एवोपपद्यते
तेन लोष्टादिर्वेद्यत्वाज्जडः वेदकत्वात्तुर्यष्टकप्रमाताप्यजडः न पुनः परमार्थेन परमेश्वरापेक्षया जडा
जडव्यवहार इति॥ ननु सर्वप्रमातॄणां तुल्यो चेत्स्वात्मनोऽप्यविशेषेण प्रस्फुरणं तर्हि सर्वे तु किमिति।
स्वात्मविदो न स्युः तज्ज्ञानवन्तो मा वा भूवन्विशेषाभावात् यत्पुनः संसारावस्थायामपि केचन स्वात्म
ज्ञानाज्जीवन्मुक्ताः सर्वज्ञत्वसर्वकर्तृत्वशालिनः॥ केचन स्वात्मज्ञानयोग्याश्चारुरुक्षवश्च ह्यपरेऽन्ये
परे स्वात्मज्ञानरहिताः संतो धर्माधर्मनिमित्तशुभाशुभकर्मनिगडप्रबंधबद्धाः संसारिण एवेति क
थमेतत्संगच्छते इत्यत्र मंत्रः सर्वकृत्वा पारमेश्वरः शक्तिपातो विशेषं खलु इति प्रतिपादयति॥ "आद
र्शे मलरहिते यद्वद्वदनं विभाति तद्वदयं शिवशक्तिपातविमले धीतत्त्वे भाति भारूपः॥" दर्प
णे मलरहिते यथा निर्विशेषरूपादिगुणगणयुक्तं मुखं च कास्ति न संशोभते अयं विनिहतमलश्चादर्शो
नु स्वीकुरुते समले दर्पणे तु मुखमनन्यातिशयमपि सम्यग्मलत्वाद्वैपरीत्येन प्रकाशते नापि मलिनसत्त्व
दीयान्गुणान्स्वीकर्तुं मलप्रस्तुततत्त्वमत्रत्वेवः पुमान्मुखमनन्यथैव सम्यग्मलत्वाद्युपेतमवलोकयत्या

पं॰ वि ७

७

त्मनो लज्जामावहतीति विकृतं महद् दूनमिति । तथैवास्यपि भावस्य स्वात्मनो या सा वन्द्यग्रहाख्या शक्तिस्तस्याश्या
तः स्वकिरणविस्फारस्तेन नमं मांजितप्रतिभा मुकुरे आणवमायीयकार्ममलवासनाप्रत्ययाद्विषदीकृते के
षां चिदयस्मिमजन्मनां प्रमातृणां भाः प्रकाशो ह्ययंस्येति स भानुः स्वात्मा यावत्सर्वज्ञत्वादिगुणगणोज्जृम्भ
णाविव न स्वावभासते येन केचनैव ते स्वात्मस्वरूपप्रथनात्मे सारमध्ययतिता अपि मन्त्रकल्पाः शान्तिशया   क
श्च केषांचिदेव परमेश्वरतिरोधानशक्त्या आणवमायीयकार्ममलसमाच्छादितबुद्धितत्त्वे भानुरूपा
त्मा मालिन्याज्ज्ञातोऽप्यभातकल्पः येन ते सांसारिकाः पशवः इत्यभिधीयन्ते अन्ये पुनरुभयशक्तियोगात्   तिरोधानानुग्रहशक्तिद्वयं
प्रमातारश्चारुरुक्षवइति इत्थं तीव्रमंदमंदतरादिभेदेन शक्तिपातवैचित्र्यं सर्वत्राभ्यूह्यं अत्र न मायो
तःपतितनियतिशक्तिपातः समत्स्थमंत्रमेधादिकं जपध्यानादिवान्यद्यत् किंचित्कर्म मोचनहेतुः आत्म
ज्ञानस्यहि मायातः समस्तनीर्णत्वाद्भेदप्रधानेवस्तुनि तत्साधनाय प्रकल्प्यते यद्गीतासु नाहं वेदैर्न तपसा   गीता॰
न दानेन न चेज्यया इति तस्मादेकमेवात्र परमेश्वरानुग्रहः कारणमकृत्रिमभक्तिबुद्धीनां यदुक्तं इष्टितः
शक्तिपातोद्भवाख्यापयित्रीस्वतंत्रता धीः कला कारणाज्ञाता नैव किंचिदपेक्षते इति [illegible]
प्रमुप्रमातॄणां तु परमेश्वरतिरोधानशक्तिः समारोहितैरेव येन ते स्वस्वरूपाप्रथनात् शुभाशुभकर्मनिर

प॰ सा॰ ८

ताः सुखदुःखादिभोगभाजः पुनः पुनरस्मिन्संसरंति तस्मात्परमात्मनः साधारणोपि स्वात्मनि प्रकाशप्र
काशात्मरूपेप्यग्रहणतिरोधानशक्तीद्धः एवमेते मोक्षबंधप्रविभागहेतुः यदुक्तं बध्नाति काश्चिदपि शक्तिरनं
तप्रलोकैः क्लेशकर्ममयप्रतिहतनाभवपाशजालैः ज्ञानासिना च विनिकृत्य गुणानशेषाननन्या करोत्यभिसुखवपु
रुषं विमुक्ताविति ॥ एवमिदं सर्वमागमा[illegible]नुभवयुक्तियुक्तं प्रतिपाद्य यस्मात्... पादः च तत्स्वरूपं प्रति
पादितं तदंतरालवर्तिसमस्तं पंचत्रिंशक्रमेण षट्त्रिंशत्तत्त्वात्मकं जगद्यल्लग्नं भाति तत्प्रथमतः कारणकारणं
परमशिवस्वरूपं कारिकाद्वयेनाह ॥ "आत्मरूपं परिपूर्णस्वात्मनि विश्रान्तितो महानंदं इच्छासंवित्क[क्रिया]
रणैर्निर्भरितमनंतशक्तिपरिपूर्णं ॥ सर्वविकल्पविहीनं शुद्धं शांतं लयोदयविहीनं यत्परतत्त्वं तस्मि
न्विभाति षट्त्रिंशदात्मजगत् ॥ यदेवंविधं परिपूर्णं शिवतत्त्वं तत्रैव शिवादिधरापर्यंतं वक्ष्यमाणं विश्वं
विश्रांतं सत्प्रकाशते तदभिन्नमेव चकासद्गुणयोपपद्यते इति यावत् ननु तन्मते सर्वं तत्त्वादि यत्र तत्त
त्त्वेतननाद्यानतत्प्राप्रलयं तस्य भाव इति वा तत्त्वमित्येवमपि तत्त्वव्यपदेशोयं जाड्यापादकः कथंचि
द्रूपे भगवति परमशिवे स्यात् उच्यते उपदेश्यजनापेक्षया यावता शाठ्येन प्रतिपाद्यते तावज्जगत्तत्र तत्त्व
व्यपदेशः न वस्तुतः कीदृशं तत्परतत्त्वं भाः प्रकाशरूपस्वभावो यस्य महाप्रकाशवपुरित्यर्थः तथाय

तत्पादाद्वयेदच तत्स्वयं=

त्स्याभावः

१८

चिद्रूपं निराकारं तं निराकारत्वमपि स्फटिकमणिदर्पणादिजडं वस्तु भवतीत्याह स्वात्मनि विश्रान्तितो म-
हानंदे स्वस्मिन्स्वभावे । स्वेदाहंताचमत्कारे से विश्रान्तिर्महानानंदः परानंदरूपा निर्वृतिर्यस्येति तदे-
व परमाह्लादस्फुरत्तासारत्वात्प्रकाशस्य स्फटिकादेर्जडाद्वैलक्षण्यमुक्तं भवति अत एवाह इच्छासंवि-
दिति इच्छाज्ञानक्रियाशक्तिस्वभावमेव न पुनः शान्तब्रह्मवादिनामिव शक्तिविरहितं जडकल्पं अनन्ता-
नंतशक्तीति अनंता असंख्या घटपटादिनामरूपात्मिकाः शक्तयः इच्छाज्ञानक्रियाशक्तीनां पल्लवभूता ब्राह्म्या-
दयः शाक्त्यः साधिमसृण्यास्ताभिः परितः समंतात्पूर्णं व्याप्तं तत एवोल्लसंत्यस्तत्रैव शाम्यंतीत्येवं परवाग्रूपं
भगवति स्वातंत्र्यमुक्तं भवति ननु वाग्रूपं चेत्परं तत्त्वं तर्हि काल्पनिकशाब्दसंभिन्नत्वात्कथं शुद्धप्रकाशवपुषि क-
ल्पनायोग इत्याशयेनाह सर्वविकल्पेति परमप्रमातृविषयः पराहंताचमत्कारः स वाग्रूपोपि निर्विकल्पः
घटादः
विकल्पो ह्यन्यापोहलक्षणो द्वयं घटपटरूपमाक्षिपन्घटोयमवच्छिन्नपटं निश्चिनोति प्रकाशस्य पुनः परा-
हंताचमत्कारसारस्यापि नाप्रकाशरूपः प्रकाशादन्यः प्रतिपक्षस्तया विद्यते यस्मादवच्छेदात्तस्य विकल्परूप-
छेदे
तास्यात् व्यवच्छेद्यो ह्यप्रकाशात्माप्रकाशवपुषि प्रकाशते चेन्न हि तत्संवेदनरूपेण तादात्म्यप्रतिपत्तिनं इत्या-
दिन्यायेन योऽयमर्थः प्रकाशस्वभावतां यातः स कथं स्वात्मनस्तस्यैव व्यवच्छेदकः स्यात् येन विकल्परूपतां तत्र स-

प.सा. वि. ५

मावहेत् अथ प्रतिपत्तृतया न प्रकाशत इति कथमिदं प्रकाशमानः पदार्थः प्रतिपत्तृरूपोऽस्तीति परिच्छेद्य
मपि शङ्क्येत इति यत् किंचिदेतत् स्यात् यतः सर्वैर्व्यवच्छेदात्मकैर्विकल्पैर्विहीनमपरिच्छिन्नस्वभावं परं तत्त्वं
अत एवाहमुक्तमिति विमलं विकल्पमय्या अशुद्धिमय्या अभावात् तथा शान्तमिति ग्राह्यग्राहकसमुत्थक्षो
भाभावादुक्तं हि श्रीमत्स्पन्दे न स्वस्वरूपस्थं न पुनरप्यसकलकलं अन्यक्तृत्वयोः [illegible]दयेति सकृद्विभातोऽयमा
त्मेति कृत्वा सदोदित एव अतो भूतभविष्यद्वर्तमानवपुः कालस्तत्र न क्रमते यतः कालस्य तत एव समुल्लास इति
समुत्पत्तिविनाशबहिष्कृते परे तत्त्वेऽभ्युपगते विश्वस्याविच्छिन्नत्वमुपपन्नमिति प्रतिपादितं स्यात् ननु एवंविधे
परतत्त्वे जगद्भातीति यत् प्रतिपादितं तत् कथमेतत् स्यात् यावता परतत्त्वापेक्षया न किंचिद्भेदेन भातं प्रगल्भ
ते ततो भिन्नं चेज्जगद्भासते तदाद्वयवादखंडना अभिन्नं चेज्जगत् प्रकाशत इति कथं वाचोयुक्तिरिति दृष्टांतद्वा
रेणाभेदाभेदरूपं तत्त्वमुपदर्शयन्नेतत्समर्थनायाह ॥ दर्पणबिंबे यद्वन्नगरग्रामादि चित्रमविभागि
भाति विभागेनैव च परस्परं दर्पणादपि च ॥१२॥ विमलतमपरमभैरवबोधात्तद्वद्विभागशून्यमपि अन्योन्य
मपि ततोऽपि च विभक्तमाभाति जगदेतत् ॥ ॥ यथा निर्मले मकुरांतराले नगरग्रामपुरप्राकारादिस्थल
नदनदीज्वलनवृक्षपर्वतपशुपक्षिस्त्रीपुरुषादिकं सर्वं प्रतिबिंबतया चित्रं सालक्षण्येन नानारूपं भास

नाना रूपं =

ॐ ५

तेऽप्यविभागिदर्पणादविभक्तं सन्नाभातितद्भेदेनैवांतराकारं समर्पयंतितत्राभेदेनभासमानमपिभातिविभागे
नैवचपरस्परमिति अन्योन्यंस्यालत्तएवनघटात्पटोभिन्नःपटाद्घटोभिन्नइतिविभक्ततयास्फुरति तदंत
र्गताद्विभावाएवस्पष्टस्वकेनपरामृश्यंतेनपुनस्तेदर्पणांतर्गतत्वेनास्पष्टाः किंचिदुपलभ्यंते किंतुदर्पणसामर
स्येनस्थितमपिसर्वंस्वतोभिन्नंजगत्प्रतीयते एवमपिघटादिप्रतिबिंबेनदर्पणस्तद्वंतर्हितःस्यात् इत्येत
न्नेत्याह दर्पणादपिचेतिनकेवलंस्वयंभावादर्पणांतर्गताअपि भिन्नाःप्रकाशंतेयावद्दर्पणादपिव्यतिरि
च्यंतेयतोदर्पणस्तत्तत्प्रतिबिंबमयोपितेभ्यःप्रतिबिंबेभ्यःसमुत्तीर्णस्वरूपतयाचकास्तिनपुनस्तन्मयः
संपद्यते येनचनदर्पणइतिप्रतीतिःस्यात् सर्वस्यपुनस्तत्तत्प्रतिबिंबग्रहणेपिदर्पणोयमित्यबाधिताप्र
तिपत्तिः नापिघटादिर्दर्पणं विपिनहि येनायंघटदर्पणोयंपटदर्पणइतिस्वस्वरूपतास्थानिरत्रजायेते ।
देशाकृतःकालकृतोवाभेदोनतत्रस्वभावविप्रलोपायभवति तस्मात्तत्प्रतिबिंबसहिष्णुःसन्स्वात्मनि — ग
दर्पणोदर्पणएवेतिनकाचित्प्रतिबिंबवादक्षतिः अथोच्यते भ्रांतिरेषायदुतदर्पणेहस्तीतिपरामृश्यते
नतुपुनर्दर्पणेसकश्चिद्विद्यतेतथात्वेनार्थक्रियाविरहात् भ्रांत्यैवेषनिश्चयइतिएतावताप्रतिबिंबवादेह — अस्मात्सि[illegible]ान्ते
ष्टांतस्तावत्सिद्धःभ्रांतेस्तत्तत्रंसमनंतरंनिरूप्यतेतद्वत् तथैवदर्पणनगरादिप्रतिबिंबदृष्टांतेनैवविमलतम

दर्पणः

परमभैरवबोधादतिशयेन विगलितकालिकात्पूर्णानंदोद्रिक्तात्प्रकाशाज्जगद्विश्वं विभागशून्यमपि दर्पणप्रतिबिं
बवत् ततः प्रकाशादविभक्तमपि परस्परं च विभक्तत्वेन ग्राह्यग्राहकाद्यैस्तया नानारूपं प्रथते ततोपि चेति बोधा
त्पृथग्भूतमिवाभाति यतो बोधस्तद्रूपतया विप्रथमानस्ततः समुत्तीर्णः प्रथते यथा प्रतिबिंबेभ्यो दर्पणः एव
मपि विश्वभावप्रतिबिंबसहिष्णुः प्रकाशो विश्वभावेभ्यः समुत्तीर्णः सर्वस्यानुभवितृतया स्वस्वरूपेण प्रथ
ते भावगतोपि देशकालाकारभेदः केवलमत्र प्रकाशात्ते दर्पणवन्न पुनः स्वरूपं संभिनत्ति अत एवैकाने
कस्वरूपोपि बोध एक एव बौद्धाभ्युपगतचित्रज्ञानवत् किं तु दर्पणप्रकाशात्स्वचमत्कारस्य चित्प्रकाशस्ये
यान्विशेषः यद्दर्पणः स्वच्छतामात्रसनाथेतु भिन्नं बाह्यमेव नगरग्रामादिप्रतिबिंबत्वेनाभिमतं भाति न तु
स्वनिर्मितं अतो दर्पणोयं हस्तीति यो निश्चयः स भ्रांतः स्यात् प्रकाशः पुनः स्वचमत्कारसारः स्वेच्छया स्वा
त्मभित्तावभेदेन परामर्शात्मसंविद्रूपाधानमेव विश्वमाभासयति विश्वस्याभासनमेव निर्मातृत्वं भगवत
इति परामर्श एव प्रकाशस्याजडाद्दर्पणप्रकाशादेर्वैलक्षण्यापादकं मुख्यं रूपमित्येतदेव ग्रन्थकृता विवृ
तिविमर्शिन्यामुक्तं अंतर्विभाति सकलं जगदात्मनीह यद्वद्विचित्ररचना मुकुरांतराले बोधः पुनर्निज
विमर्शनसारयुक्त्या विश्वं प्रकाशयति नो मुकुरस्तथा तु इति इत्थं परमेश्वरस्येच्छया स्वांगनिर्मितभावरा

परामृश

भेदवोप

ष्णोतकाचिद्भेदभ्रांतिः॥ मायाप्रमातृभेदेनयात्तयोयंबोधावभासएषापूर्णत्वाख्यातिरूपभ्रांतिः॥ पूर्णस्याहंतया
त्मनोरूपस्याख्यानम्॥ अथापूर्णत्वभासते किंत्वपूर्णाहंतयरूपंभासते भेदएवप्रतीयतेइतियावत्॥ तस्मान्निरव
द्योयंप्रतिबिंबवादः॥१३॥ इदानींपरतत्त्वस्वरूपनिरूपणानंतरंप्रकाशाभेदेनजगतःषट्त्रिंशत्तत्त्वात्मकस्यास्थि
तिंविधायपुनरप्येतस्यसप्रमातृतत्त्वक्रमेणप्रतितत्त्वंस्वरूपंकारिकाभिःप्रतिपादयति॥ ॥ शिवशक्तिस
दाशिवतामीश्वरविद्यामयींचतत्त्वदशां शक्तीनांपंचानांविभक्तभावेनभासयति॥१४॥ योयंपरमशिवः
परतत्त्वनिरूपणायामनंतरप्रतिपादितस्वभावःस्वस्वरूपरूपाःस्वाःशक्तयःचिन्निर्वृतिइच्छाज्ञानक्रिया
ख्याःपंचअनंतशक्तिव्रातहेतुभूतास्तासामेवपंचानांशक्तीनांभिन्नत्वेन अतएवापृथग्भूताइमांतत्त्वदशामप
चमरव्यावच्छिन्नामेवभासयतिस्वालक्षण्येनप्रकटयतीत्यर्थः कीदृशीतामित्याह शिवेत्यादि शिवश्चा
शक्तिश्चसदाशिवश्चतेषांभावोयस्याःसातथोक्तातांतथाईश्वरविद्येप्रकृतिर्यस्याःसातथेति अत्रप्र
तितत्त्वंस्वरूपंप्रदर्श्यते तथाहि सर्वप्रमातृणामंतःपूर्णाहंताचमत्कारमयंसर्वतत्त्वोत्तीर्णमहाप्रकाश
वपुर्यच्छिवतत्त्वमेतदेवशिवतत्त्वं १ अत्रतत्त्वनिरूपणमुपदेशपूजनापेक्षयेति तस्यैवभगवतश्चिद्रूप
स्यानंदरूपाविश्वंनभवामीतिपरामृशतोविश्वाभावस्वभावमयीसंविदेवकिंचिदुच्छूनतारूपासदैभा

प॰सा॰
वि॰
११

वानां बीजभूमिरियं शान्तावस्था एषैव विश्वगतसृष्टिसंहारोपचारात् शक्तिरुभयरूपाप्येकैव सर्वदेहस्पन
धेषु गीयते २ पुनरप्यत्रैव विश्वसमुत्पत्तिबीजभूमौ महाशून्यातिशून्यायां महेशस्याहमिदमित्यभेदो
न्मेषणीहंतामयो यश्चमत्कारो ज्ञानप्राधान्यात्क्रियाभागस्याहंताविश्रान्तेः सेयं सदाशिवदशा ३ अत्र मंत्र
महेश्वराः प्रमातारस्तिष्ठंति तथात्रैव अहमिदमित्यभेदेनाहंतेदंतयोः समधृततुलापुटन्यायेन यः स्वात्म
चमत्कारः सैषा तत्र ईश्वरावस्था अत्रापि मंत्रेश्वराः प्रमातारः अत्रापीदंताप्राधान्येनाहंतागुणीकारेणायो
हमहमिदमिदमित्येवंरूपश्चमत्कारः सद्योजातबालस्येव शिरोंगुलीनिर्देश्यः एतदेव बोधसारत्वाद्भग
वतः शुद्धविद्यातत्त्वं ५ अत्र विशेषैः सप्तकोटिसंख्यमंत्राणां वाचकतयानुग्रहस्वभावात्पसृ
द्धतेर्वाच्यान्मंत्रमहेश्वरमंत्रेश्वरानत्यवतिष्ठंति अत्र विद्यातत्त्वे विद्येश्वरप्रमातॄणां बोधरूपत्वाविशेषेपि
याभेदप्रथा सा मायाशक्तिरिति तेत्यागमेषु गीयते मायोपरि महामायेति येन तत्रस्था मंत्रा महामायान्त
प्रवेशाद्दशावद्वस्तुच्यंते मायातत्त्वोपरि शुद्धविद्याधश्च विज्ञानकलाः प्रमातार आणवमलभाजन एव
मेकमेवेदं शिवस्वरूपं तुर्यातीतमपि तुर्यारूपतया तत्त्वपंचकतया गीयते तस्मादेक एवेश्वरः स्वतंत्रः कर्ता
प्रकाशते यस्याहमिदमिति सदाशिवेश्वरभूमौ यः प्रकाशः तदेव शुद्धवेदनरूपं कारणं वक्ष्यमाणं माया

अहंतायां लयात्-

१६
११

शिवादि

तत्त्वादिधरान्तस्तत्त्वसर्गश्च कार्यमित्येवं कर्तृकरणक्रियारूप एक एव स्वात्ममहेश्वराख्यः परमप्रमाता विजृं-
भते ॥ मायातत्त्वस्वरूपमाह ॥ ॥ परमं यत्स्वातन्त्र्यं दुर्घटसंपादनं महेशस्य देवी मायाशक्तिः स्वात्मावरणं
शिवस्यैतत् ॥ ॥ परममनन्यापेक्षं यत्परमेशितुः स्वातन्त्र्यं विश्वनिर्मातृत्वं सैवेयं मायाख्या शक्तिस्तस्य श-
क्तिमतो मीयते परिच्छिद्यते धरान्तः प्रमातृप्रमेयप्रपञ्चो यया सा माया विश्वमोहकतया वा माया एषा दे-
वस्य क्रीडाशीलस्य संबन्धिनी नित्यत्वाद्देवी न पुनर्ब्रह्मवादिनामिव व्यतिरिक्ता काचिन्मायोपपद्यते द्रा-
ति कीदृशी तत्स्वातन्त्र्यं दुर्घटसंपादनमिति दुःखेन घटयितुं शक्यमिति दुर्घटं कार्यस्य प्रमातृप्रमेयरूपस्य
संपादनं प्राप्तिप्रापकं एषा एव माया स्वेच्छया पशुभावमापन्नस्य शिवस्य स्वात्मावरणं स्वरूपगोपना स्वमा
णवादिमलत्रितयं ॥ ॥ वक्ष्यमाणे च प्राधानिके खादिरूपे भिन्ने भोग्ये यद्भोक्तृरूपं तत्त्वं तत्स्वरूपमाह
मायापरिग्रहवशाद्बोधो मलिनः पुमान्पशुर्भवति कालकलानियतिवशाद्रागाविद्यावशेन संबद्धः ॥ १६
मायास्वीकारवशात्स्वात्मसर्वज्ञत्वसर्वकर्तृत्वमयोऽपि बोधः सर्वज्ञतादिगुणापहस्तनेन अख्यातिरूपमाण-
वं मलमापन्नः येन घटाकाशवत्पूर्णस्वरूपाच्चिदाकाशाद्विच्छिद्य परिमितीकृतः सन् तदेव पुंस्तत्त्वमु-
च्यते अतो मायायाः पाल्यः पाश्यः पशुरिति पशुः आणवमायीयकार्ममलस्वभावानां पाशानां भाजनं अन्य

प.सा.
वि
१२

12

ष्ककालकलेति वक्ष्यमाणस्वरूपैः कालादिभिरोतप्रोततया सम्यग्बद्धो ह्ययं इत्येवं तत्त्वषट्कवेष्टितं पुंस्तत्त्वं ॥१९॥
कालादीनां तत्त्वानां चैतद्वेष्टनक्रमेण स्वरूपमाह ॥ अधुनैव किंचिदेवेदमेव सर्वात्मनैव जानामि
मायासहितं कञ्चुकषट्कमणोरन्तरंगमिदमुक्तं ॥ इत्थं स्वातंत्र्योपि बोधः स्वमायया यथा एवं प्राप्त
स्तथैव तदीयज्ञानक्रियाशक्ती संकुचिते अस्य पशुरूपस्य विद्याकले इत्युच्येते यथा राज्ञापहृतसर्वस्वस्या
वकेनचिज्जीवनार्थं किंचिद्धनं स्तोकं दीयते तथैवात्र आत्ममायया तत्स्वबोधस्यापहृतसर्वज्ञत्वादेः किंचित्क
र्तृता परमार्थज्ञातृत्वमपि कल्प्यते इति ज्ञानस्यैव प्राधान्यात्कालादीनां ज्ञानादिति नान्वयो दर्शितः इदं कंचु
कषट्कमुक्तं रूपतया मायया युक्तमणोराणवमलापहस्तितसर्वज्ञत्वादेः पुंसः स्वरूपाच्छादकं स्वर्णस्य का
लिकेवान्तरंगं निजं कथितं किंरूपमित्याह अधुनेत्यादि अधुनैव जानामीति सोऽयं वर्तमानतया इद
माद्यतया ज्ञातं जानामि ज्ञास्यामीत्येवमपि कृतं करोमि करिष्ये वेति ज्ञानस्वरूपेण भावानपि तथा कल
यन्नवच्छिन्नचितेपिबोस्य कालः १ तथा किंचिदेवेति अवच्छिन्नमेव करोति न सर्वं कर्तृमलं घटमात्रकारणा
यत्करणत्वमप्रभवति न पटादाविति तदस्याप्यणोः कलातत्त्वं २ इदमेवेति नियतात्कारणान्नियतं कार्यमुद
र्थ्यते यथा वह्नेरेव धूमः अश्वमेधादिकर्मण एव स्वर्गादिफलं न सर्वं सर्वस्मादित्येवं नियमेन स्वसंकल्पकृतं ॥

ज्ञानं यावच्छिन्नतित
छिबयच =
क्रिया

समर्थ
२

तस्यात्मीयमात्मानमवच्छिद्य
मूर्तमभविष्यद्रूपतया ॥ ५

दि॰

कर्मप्रबंधसमुत्थपुण्यापुण्यरूपे परात्मा नियम्यते येन तत्स्यान्नियतितत्त्वं ३ तथा सर्वात्मनैवेति येयमपूर्णो।
मन्यता सर्वं ममेदमुपयुज्यतां भूयांसं मा कदाचिन्नाभूवमित्ययं तत्पशो रागतत्त्वं ४ बुद्धिधर्मो यो रागः स एव
कत्रापि कोतालत्तणोर्थेनाद्यमोह अत्रमे राग इत्यभिष्वंगमात्रं न सर्वाकांक्षामयस्य रागतत्त्वस्य समा
नः तथा जानामीति किंचिदेव पुरोवर्ति घटादिकं न पुनर्दूरस्थव्यवहितं वस्त्विति विद्यातत्त्वं ५ शुद्धविद्या।
पेक्षया कारिकायामविद्येति कथितं न पुनर्वेदनाभावात् मायासहितं भेदप्रथात्मकमेतत्कंचुकष।
ट्कं पशोरिति ॥१७॥ कथमेतस्य कंचुकषट्कस्यात्यंतमात्मनो अतिरंगत्वमित्याह कंचुकमिव तंडुलकणावि
निविष्टं भिन्नमप्यभिदां भजते तन्न विशुद्धिं शिवमार्गोन्मुख्ययोगेन ॥१८॥ वास्तवेन वृत्तेन भिन्नमपि
कंचुकं यथा अभिदां तंडुलकणाविनिविष्टमिति अभेदेन तंडुलांतस्थांतं भासते निष्कोशोरपि यत्नतः प्रति
पद्यमानं तंडुलस्यांतरंगत्वात् पृथगवतिष्ठते तद्वदेतन्मायादिकंचुकमणोस्तंडुलस्थानीयस्यांतरंगत्वात्कं
चुकस्थानीयं व्यतिरिक्तमप्यव्यतिरिक्ततया पूर्णसंवित्स्वरूपमाच्छाद्य स्थितमिति शेषः एवमपि दुर्नि
वारं कथं तर्हि विलीयत इत्याह भजते इत्यादि तद्विशेषे नान्योत्रोपायः शिवस्य स्वात्ममहेश्वरस्य योसौ
मार्गः परमाद्वयचिदानंदैकघनोस्मि ममैवेदं विश्वं स्वशक्तिविजृंभणामात्रमिति यात्मस्वरूपविभूति

अविद्येति कथितम्

प॰ वि॰

13

प्रत्यवमर्शरूपासरणिस्तदैश्वर्यंदार्ढ्येनतन्निभालनैकपरत्वंसएवयोगः पूर्णत्वरूपतयाणोःस्वात्म
निस्वस्वरूपत्वेनसंबंधःयेनतद्युक्तस्वरूपंकञ्चुकविशेषेणशुद्धिंभजतेस्वयमेवनिःशेषेणविलयमेवते
एतद्युक्तंस्यात् यदापरमेश्वरशक्तिपातविशुद्धहृदयःपशुर्भवतितदाअहमेवमहेश्वरइति स्वात्मज्ञा
नाविर्भावात्स्वयमेवपशुत्वापादकंकंचुकावरणंविलीयते नपुनरत्रस्वात्मज्ञानंविहायमायीयंकिंचि
न्नियतिशक्तिसमुत्थंकर्मप्रगल्भतेइति १८ एवंविधस्याणोर्भोक्तुःस्वभोग्येनभाव्यमिति प्राधानिकं
तत्त्वमाह ॥ सुखदुःखमोहमात्रंनिश्चयसंकल्पनाभिमानाच्च प्रकृतिरथान्तःकरणंबुद्धिमनो
हंकृति क्रमशः ॥ सत्त्वरजस्तमसांयत्सुखदुःखमोहात्मकंसामान्यंरूपमंगांगिभावोयत्रनोपल
भ्यतेसामूलकारणंप्रकृतिःप्रकृतेरनन्तरंकार्यरूपमन्तःकरणमाह निश्चयेत्यादि निश्चयइदमेतादृ
गिति संकल्पनंमननं अभिमानोममाहमितिक्रमेणबुद्धिर्मनःअहंकारइत्येवंरूपंत्रितयमन्तःक
रणं अंगांगिभावेनगुणानांकार्यभूतेन्द्रियाद्यपेक्षयाकारणमिति १९ बाह्यकरणमाह श्रोत्रंत्वग
क्षिरसनाघ्राणंबुद्धीन्द्रियाणिशब्दादौ वाक्पाणिपादपायूपस्थंकर्मेन्द्रियाणिपुनः २० वक्ष्यमाणेषु
शब्दादौविषयेज्ञानप्रधानानिश्रोत्रादीनिपंचेन्द्रियाणि क्रियाप्रधानानिचेन्द्रियाणिपंचवागादीनिवच॰

तोयः स्या

वागादानविहरणविसर्गानंदात्मकानि कर्मेंद्रियाणि विषयाणीत्युभयथापि च स्फुरणेमि कथयामीत्यहंकारा-
त्वग्गमादहंकारकार्याणि १९ एवं शब्दादिविषयस्वरूपं कथयति एषां ग्राह्यो विषयः सूक्ष्मः प्रवि-
भागवर्जितः तन्मात्रपंचकं तच्छब्दः स्पर्शो महो रसो गंधः २० नेयकार्यं तयास्त्वीकार्यः यएषामिं-
द्रियाणां विषयो गोचरः स्यात् स कीदृशः प्रविभागवर्जितः विशेषेण बहिष्कृतः सामान्यात्मा सूक्ष्मो
योर्थो भवेत् तदेव शब्दादिसामान्यस्वरूपं तन्मात्रं शब्दसामान्यं शब्दतन्मात्रमित्येवमन्यानि विषयविशे-
षिणो परस्परापेक्षितत्वादिदं वदिदमपि तन्मात्रपंचकमाहंकारिकमेवेति २१ विषयाणां परस्परसं-
कर्षेण पृथिव्याद्यादिकार्यमित्याह एतत्संसर्गवशात्स्थूलो विषयस्तु भूतपंचकतां प्रेत्येति नभः
पवनस्तेजः सलिलं च पृथ्वी च २२ एतेषां संसर्गवशात्परस्परसंघर्षसामर्थ्याद्यो विशेषः स्थूलो विषयः स
एवभूतस्वरूपतां याति तस्माच्छब्दतन्मात्राच्छब्दविषयो नभो जायते शब्दस्पर्शाभ्यां पवनः रूपसंयुक्ता-
भ्यामेताभ्यां तेजश्च एभ्यो रससंयुक्तेभ्यश्चापः गंधसंयुक्तेभ्यश्च पृथ्वीति पंचमहाभूतानि कार्यका-
रणानुगुणमिति कृत्वा एकोत्तरगुणानीत्येवमेषा प्रकृतिः कार्यकारणात्मा पुरुषस्य परमेश्वरस्ये-
च्छया भोग्यतया प्रवृत्तेति षट्त्रिंशत्तत्त्वात्मकं जगद्विभज्य प्रतिततत्त्वं निरूपितं २३ मायाकंचुकवत्प्रकृ

महामहेश्वरः १ मन्त्रेश्वरः २ विद्येश्वरः ३ विज्ञानाकलः ४ प्रलयाकलः ५ सकलः ६ एते परमप्रमातृशिवसहिताः सप्तप्रमातारः ७ ॥

तैः कंचुकतां पुरुषस्येत्याह तुषइव तण्डुलकणिकामावृणुते प्रकृतिपूर्वकः सर्गः पृथ्वीपर्यन्तोऽयं चैतन्यं
देहभावेन २२ अयमपि प्राधानिकः सर्गो धरापर्यन्तः तण्डुलकणं यथा तुषो धान्यचर्म आवृणुते समा
च्छादयति तथैव मायाकंचुकेन कंचुकस्थानीयेन समावृतं चैतन्यं पुनरपि तुषस्थानीयेन देहभावे
नैतत्समावृणुते तत्प्रतिभाकारतया स्थगयति अत्रेमे प्रमातारः कलाभिरिन्द्रियमात्राभिर्विशेषैता
भिर्देहस्वभावाः सकला इत्युच्यन्ते विशेषवर्जिता विदेहाः प्रलयाकला इति चैवं शिवादिसकलान्तप्रमा
तृसप्तकसनाथरुद्रक्षेत्रज्ञाधिष्ठितं जगदिति २३ कंचुकत्रितयमपरसूक्ष्मस्थूलरूपतामाह परमा
वरणं मलइह सूक्ष्मं मायादिकंचुकं स्थूले बाह्यं विग्रहरूपं कोशत्रयवेष्टितो ह्यात्मा २४ चैतन्यस्य स्व
स्वरूपाहरणेन स्वस्वरूपाख्यातिरेव प्रागणवो मलः अतः पूर्णस्यैव कालिके परमेतरङ्गमावरणं छादनं
तादात्म्येन स्थितत्वान्मायादिविद्यान्तं कंचुकषट्कं सूक्ष्ममान्तरमावरणं तण्डुलस्य कंचुकमिवाणोरेव
रणोऽनुपातित्वेनास्ते येन भेदमयी ज्ञातृकर्तृत्वादि प्रथा प्रथते इत्येष मायीयो मलः एतद्रूपेत्तयाबा
ह्यं तुषस्थानीयं प्राधानिकं शारीरसमालक्षणमावरणं स्थूलं त्वङ्मांसादिरूपत्वात् एष तृतीयः का
र्मो मलः येन प्रमाता शुभाशुभकर्मसंचयभाजनं भवति एवमनेनपरसूक्ष्मस्थूलरूपेण कोशत्रयेण

15

सर्वेत्तात्प्र
माताऽदेहः
किंचिज्ज्ञोऽदे
वज्ञः

ॐ

पतत्त्वं वच्यादपह्नुत इव संभवतीत्याह ^

वेष्टितो विकस्वरो ऽपि घटाकाशवत् संकुचितीकृत आत्मेति अणुरिति परिभाष्यते २४ ४ अज्ञानति
मिरयोगादेकमपि स्वं स्वभावमात्मानं ग्राह्यग्राहकनानावैचित्र्येणावबुध्येत २५ एषको ऽणत्रयसंब
द्ध आत्मा आत्मा ख्यात्यंधकारसंबंधादेकमप्यद्वयस्वभावमपि स्वं निजं नान्यस्मादुपनतमात्मस्वभा
वं चैतन्यमात्मसत्तालक्षणं स्वरूपं प्रमातृप्रमाणप्रमेयनानारचनया नानाप्रपंचेन जानाति अभेदवि
परीतेन भेदेनाभिमन्यते इति यावत् यथा रेखातिमिरोपहतः पुरुषः एकमपि चंद्रं पश्यति द्वौ चंद्रा
विमौ न भविष्यतः इति परिच्छिन्नलोकमपि दर्शयते द्वौ चंद्राविमौ पश्येति वस्तुवृत्तेनैक एवासौ चं
द्र इति तिमिरवशात्तथाभासते येनोद्वेगलक्षणमानंदलक्षणं वार्थक्रियासौ तैमिरिकः आप्नोति
तथैवाज्ञानतिमिरग्रस्तभेदग्रथः सर्वस्वात्मनो भिन्नमपि स्वं व्यवहरन्भिन्नं कर्मफलमर्थयते येन भूयो भेदेन ^
भूयः स्वर्गनिरयादिभोगभाग्भवति अतश्चाज्ञानस्य तिमिरतारूपेण विपरीतासनात् २५ आत्मा तेन ^
त्वं ^ द्वयं दृष्टान्तेन निदर्शयति रसफाणितशार्करिकागुडखंडाद्या यथेक्षुरस एव तद्वद्वस्थाभेदाः स
र्वे परमात्मनः शंभोः २६ रसादयस्तु भेदा यथा एक एवेक्षुरसः परमार्थतः सर्वत्र माधुर्यानुगमात्
तथैव जाग्रदाद्यवस्थाभेदा ग्राह्यग्राहकप्रपंचरूपाः सर्वे विशेषाः परमात्मनः स्वस्वभावस्य शंभोः चैत

प॰ सा
वि
२५

15

त्वमहेश्वरस्यैव यतः स एव भगवान्सर्वस्य स्वात्मभूतः स्वस्वातंत्र्यात्तांतामपि भूमिकां समापन्नस्तथा तथा
ग्राह्यग्राहकाद्यवस्थाविशिष्टाः प्रथां प्रथते यथोक्तं स्वः सन्नपि स्वात्मनस्तस्माद्भिन्नं किंचिदस्तीति स
एक एव सर्वास्ववस्थासु संविदानुगमात् इत्थं सर्वत्रैकस्वरूपतादर्शनात्समाता सर्वदृश्वा भवति १
यथाह श्रीशंभुभट्टारकः एको भावः सर्वभावः स्वभावः सर्वे भावा एकभावस्वभावाः एको भावस्तत्त्व
तो येन दृष्टः सर्वे भावास्तत्त्वतस्तेन दृष्टा इति भगवद्गीतास्वपि सर्वभूतेषु येनैकं भावमव्ययमीक्षते अवि
भक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकमिति २८ १ तीर्थांतरपरिकल्पितस्तु भेदः संवित्पर्यंमभ्युपगतो
पि न मतप्रभूमावव कल्पत इत्याह १ १ विज्ञानांतर्यामिप्राणविराड्देहजातिपिंडा तताः व्यवहारस्याक्रमे
तत्परमार्थेन तत्र न संत्येव २२ १ विज्ञानमिति बोधमात्रमेव केवलमेवोपाधिनामरूपरहितमप्यना
दिवासनाप्रवाहसंवेचित्र्यसामर्थ्यान्नीलसुखादिरूपं बाह्यरूपतया नानाप्रकाशत इति विज्ञानवादिनः भुरु
ष एवेदं सर्वं नेह नानास्ति किंचनेति न्यायेनांतर्यामि सर्वस्येति परमं ब्रह्मैव अनाद्यविद्यावशाद्वेदेन प्रका
शत इति ब्रह्मवादिनः अत्रैव भयत्रापि वेदनस्य स्मातं तत्रांजीवितभूतं विश्वनिर्माणहेतुरिति न चेतितं अन्ये प्रा
णब्रह्मवादिनस्तु यथा प्राणनमेव विश्वमागूर्य वर्तते न हि प्राणनाद्धेन्यत्किंचिद्ब्रह्मणो रूपमितिस

उ
२५

विमर्शमयाद् ब्रह्मणोऽग्राङ्गः अपरे प्रतिपन्ना यथा विराट्‌देहमिति वैराजमिति ब्रह्मणः सत्यभूतमिति यथो
क्तं यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नमः इत्येवमा
दिः जातिरिति महासत्ता सामान्यलक्षणं सर्वगुणाश्रयं वस्तु परमार्थं सदिति वैशेषिकादयो ब्रुवते अ
न्येपि पिंडा इति व्यक्तय एव परमार्थसत्याः न हि सामान्यं नाम किंचिदेकमनेकगुणात्मकं प्रकाशते ना
प्युपपद्यते उपयुज्यते वा इति व्यक्तीनामेव व्यवहारः परिसमाप्तः किं सामान्येनेति नानाहेति विका यक्ति
ल्पैः सामान्यं विवदमाना व्यक्तयो नानुयंति अन्यदनुयायि न भासत इति एवमादिर्बहु ब्रुवते जा
तिर्न परमार्थ इति प्रपंचनादित्येवं विज्ञानादिपिंडे ते येषां भेदा नांते तथोक्ता व्यवहारमात्रमेतदिति अ
स्मिन्नाते अवादे प्रकाशमानस्य वस्तुनोऽनपह्नवीयत्वादेते भेदाः संवृतिसत्यत्वेन प्रकाशंते परमार्थेन
न४ त्वसत्या एवेति न पुनः स्मतत्त्वतथैते भेदास्तीर्थांतरपरिकल्पितभेदा विद्यमाना एव तस्मादेक एव परमप्र
काशः परमार्थः स्वतंत्रश्चैतन्यमहेश्वरः इत्ययमित्थं च कास्ति यतोऽन्यस्यैतद्व्यतिरिक्तस्याप्रकाशरूपस्य
प्रकाशमानताभावात् यदुक्तं तीर्थक्रियाव्यसनिभिः स्वमनीषिकाभिरुत्प्रेक्ष्य तत्त्वमिति यद्यदमीव
देति तत्तत्त्वमेवं भवतोऽस्ति न किंचिदन्यत्संज्ञासु केवलमयं विदुषां विवादः २२ इदानीं शांतेरसदर्थ

प्रतिपादनसमर्थेन निदर्शनमाह । रज्ज्वां नास्ति भुजंगस्त्रासं कुरुते च मृत्युपर्यन्तं । भ्रान्तेर्महती शक्तिर्न विवे-
क्तुं शक्यते नाम ॥ २७ ॥ भ्रान्तेः पूर्णात्वाख्यातिरूपाया अतद्रूपप्रतिभासने महती शक्तिरुत्तमं सामर्थ्यं न
केनचिद्विवेक्तुं शक्यते न केनचिद्विचारयितुं पार्यत इति यावत् । यथावस्तु वृत्तेन रज्जुः परिदृश्यमाना दी-
र्घत्वकुण्डलिनीरूपत्वभ्रमात् सर्पोयमित्यध्यवसायात्तस्यां रज्जुइवोप्यसदर्थप्रतिभासोयं सर्पावसायः
सदर्थप्रतिभासाद्भयं मरणावसायं विदधाति । अनुभवसिद्धमप्येतत् स्थाणुभूतमिति मत्वा स्वयमभी-
षणीयं वांकं रसं गृह्णि रज्वा भ्रान्ताः सन्तो हृद्रोगनाशं केलामनयाताः इति विभ्रम एव अपूर्णत्वप्रथने हे-
तुरिति ॥ २८ ॥ एतच्च प्रकृते समर्थयते । तद्वद्धर्माधर्मस्वर्निरयोत्पत्तिमरणसुखदुःखवर्णाश्रमा-
दि चात्मन्यसदपि विभ्रमबलाद्भवति ॥ २९ ॥ एवं यथा रज्जुः परमार्थसती भ्रान्त्या सर्पतया विमृश्यमाना सर्प-
गतामर्थक्रियां करोति तथैव देहात्माभिमानिनां चेतसि धर्मादि असदपि तत्त्वतो विद्यमानं विभ्रमवशा-
न्मायाव्यामोहसामर्थ्यादेव भवति एतदेव तत्त्वमिति भ्रान्त्या सत्तां लभते । धर्मः अश्वमेधादिः अधर्मो ब्र-
ह्महननादि स्वर्निरतिशया प्रीतिः निरयो यातना उत्पत्तिः जन्म मरणं जन्माभावः सुखमाह्लादः दुः-
खं रजःक्षोभः तथा वर्णो ब्राह्मणोस्मीत्यादिः आश्रमो ब्रह्मचारीत्यादि आदिग्रहणात्तपः प्रजाव-

उ
१६

16

तानिरिति सर्वं कल्पनामात्रसारं विभ्रमविजृम्भितमेव मायाशक्त्या देहाद्यात्मतयाभिमन्यते एतत्सर्वं भ्रान्तेः प्रा
भवति यया अनवरतं स्वर्गनरकजन्ममरणप्रबन्धभाजः पशवः न पुनः परमार्थतः स्वात्मनो न वस्तुत्वं त्रचि
दात्मैकघनस्य धर्माधर्मादिकं किंचिद्विद्यत इति २४ एवमस्य समर्थ्यप्रतिभासने भ्रान्तेः सामर्थ्यं विचा
र्यं तदुत्पत्तिमाह एतत्तदंधकारं यद्भावेषु प्रकाशमानतया आत्मानतिरिक्तेष्वपि भवत्यनात्माभिमा
नोयं २५ एतत्तदंधकारमिति एषा सा समनन्तरप्रतिपादिता विश्वमोहिनी पूर्णताख्यातिरूपा भ्रा
न्तिः यद्भावेषु प्रमातृप्रमेयरूपेषु विश्ववर्तिषु पदार्थेषु प्रकाशमानतयेति नाप्रकाशः प्रकाशत इति
प्रकाशमानतान्यथानुपपत्त्या प्रकाशशरीरभूतेषु आत्मनश्चैतन्यमहेश्वरादपृथग्भूतेषु सत्स्वपि यो
यमतिरेकेणामीभावा ग्राह्यग्राहकात्मनो भिन्ना इत्यनात्माभिमानः वास्तवचिद्रूपतापहस्तनेन यत्तेषु
अवास्तवं जडत्वापादनं अयमाशयः भावप्रकाशने अन्यस्याप्रकाशरूपस्य बाह्यस्वभासनाहेतोरनुपप॰
द्यमानत्वात्स्वात्मप्रकाश एव स्वतंत्रोऽर्थात्मना नीलसुखादिना प्रकाशते अतः प्रमातृप्रमेयरूपतया विश्व
रूपोऽहमेव प्रकाश इति यद्वास्तवं रूपं तत्र प्रकाशते केवलमेव अवास्तवो भेदः प्रथत इति तान्त्रिकप्रथा
नाभावाद्भ्रान्तेरंधकारेण रूपणमिति २६ आत्मन्यानात्माभिमानपूर्वकः अनात्मन्यात्माभिमानो भव॥

मा॰न॰

प॰
सा॰
वि॰
९

17

तीति प्रतिपादयन्भ्रांतेः स्वतरां मोहरूपतामाह ॥ तिमिरादपि तिमिरमिदं गंडस्योपरि महानयं स्फोटः
यदनात्मन्यपि देहप्राणादावात्ममानित्वं ॥ अ॰ आदौ तावदेकस्मिन्वितते ह्येकस्मिन्नपि भावेषु भेदमयं जाड्या
पादनमेव ख्यातितिमिरेण कृतं यत्स्वात्मनो भिन्नानां भावानां । ततो भेदेन प्रवर्णं अत एव तिमिरमिव ति
मिरमाख्याति, यथा एकोपि चंद्रश्चक्षुःस्थेन रेखातिमिरेण द्विधाभासमानो द्वौ चंद्राविति, तथैव आ
ख्यातितिमिरमेकमपि सर्वस्वात्मस्वरूपवस्तु भेदेन । अनात्मत्वं यं प्रकाशितवान् एवमस्थिते तिमिर
मपरमायातं महामोहो यमायाति ततः गंडस्योपरि गंडकोद्भवस्फु यदख्यात्यपहस्तितचित्स्वरूपं चापि वि
ष्वक्तिषु पदार्थेषु जाड्यमापादितेषु मध्याद्दृष्टेत्यतिरिक्ते जडे देहप्राणादौ वेध खंडे कृशोहं स्थूलो
हं वृद्धितोहं स्वरूपमस्मिन किंचिदहमिति प्रमात्रतया अनात्मभूते आत्ममानित्वमतद्रूपे तद्रूपप्रति
पत्तिः एतदतिविषमं यदि तावदात्माभिमानेन विनावैषम्यमस्ति तन्नीलरक्तखादिवर्णैस्तु मा वाजया
पिभूत् यत्पुनः कतिपये जडे देहादौ लोष्टप्राये देहादौ आत्मतया अहंता रसाभिषेको न्यत्र नीलरक्त
खादौ इदंतया अनात्मत्वप्रतिपादनं एष एव पूर्णः संसारः शोचनीयः यदभिमानोपनतो खबडः
खादिघातः कर्षतिपक्षनिति यदुक्तं मार्कंडेयपुराणे योगिन्यामदालसलसयायानं हितोयानग

कृमित्रख्यातितिमिरे॥

शसं

आत्माभिमान रूपं वैषम्

३

९

हन्द्वाभि

यदि तावद्देहादावनात्मन्यात्माभिमानेपि वैषम्यमस्ति = २

३२

तद्देहोहं देहेपि चान्यः पुरुषो निविष्टः ममत्वमन्यं न तथा यथा स्वे देहे इति मात्सर्य विमूढचेष्टा इति एवमख्या
तिवशान्मिथ्यात्मविकल्पैरित्यमात्मानं बध्नातीत्याह देहप्राणविमर्शनधीज्ञाननभःप्रपंचयोगेन
आत्मानं वेष्टयते चित्रं जालेन जालकार इव २२ अख्यात्युपहृतचैतन्यः सर्वः प्रमाता सृष्टै विकल्प
निगडैः व्यापकमप्यात्मानं वेष्टयते कथमित्याह देहादि देहप्राणयोर्विमर्शने धियो ज्ञाने नभसः प्र
पञ्चो विस्तारः तद्योगेन देहादिविकल्पसंबंधेन यथा कृशः स्थूलः रूपवान् खेडितश्चास्मीति बालाङ्ग
नाः पामराश्च त्यक्त्वेन विकल्पेन देहमात्रमात्मत्वेन प्रतिपन्नाः किंचिद्विवेकंमन्याः देहस्तावदिहैव प्र
लीयते अतोस्यात्मत्वं अतोयः क्षुधितः पिपासितः सोहमिति प्राणात्ममानिनश्च विवेकंमन्यतराः
देहप्राणौ जडौ लोष्ठादिवत् अतो नयोरात्मभावः ततः सुख्यहं दुःख्यहमिति यः सुखदुःखादिवेत्ता
स आत्मेति पुर्यष्टकमानिनः मीमांसकादयोपि विवेचन्तमाश्च एतन्नो बौद्धा अपि बुद्धिधर्माः कथमा
त्मतया व्यवहर्तुं शक्याः ततो देहप्राणधीविकल्पानां यत्राभावः स आत्मा इति शून्यात्ममानिनः एवं या
त्किंचिदिदं भाति तन्नाहमिति अप्रथात्मरूपं शून्यमेव सर्वापोहनस्वभावमात्मा इति नभःशाद्वलोक्ताः
तदपि शून्यं यदा सावधानावसरे वेद्यीभवति एतदपि शून्यं वयं न भवाम स्तदृशून्यातरमात्मत्वेनावेद

प. सा. वि. १८ वेष्टते:

18

धाना: नेतिनेतिब्रह्मवाद्युपगततत्तच्छून्यपरित्यागेनतांतांशून्यात्मतांपरिगृह्णातीतिनभः।अपञ्चःका
रिकायांनिरूपितः।तूर्यसंवित्स्वरूपापेक्षयैवसानाच्छून्यात्ममानिनोयोगिनःरिवदानीमप्राज्ञात्मा
नोभ्रांताएवआत्मानंसंवित्स्वरूपमपिजाड्येनावेष्टयंतीतिचित्रमितिआश्चर्यमेतत् यदुक्तंतेनेहदृष्टमस्था
धकर्तुम्प्रणीहितंइत्यत्रदृष्टांतमाह जालेनेत्यादि यथाजालकारःकश्चित्क्रिमिर्वास्वनिर्मितेनफेनिलेन
जालमावरणंनिर्मायसर्वतोगतिमात्मानंवेष्टयतेसस्वात्मनिधनायएवभाति येनोत्तरत्रतत्रैवनिधनं
याति तथैवदेहाद्यात्ममानीस्वविकल्पकल्पितेनाहममेतिविकल्पैःस्वात्मानमेवबध्नाति तथा
चबोद्धाः सत्यात्मनिपरमेशस्वपरविभागान्यथाद्वेषौ अनयोःसंप्रतिबद्धाःसर्वेदोषाःप्रजायंतेइ
त्याहुः ३२ कथमेषदुर्निवारोमहामोहोदेहादिप्रमातृतासमर्थःप्रलीयते भगवंस्तत्प्रमेवाहदेव
तित्याह ॥स्वज्ञानविभवभासनयोगेनोद्वेष्टयेन्निजात्मानं इतिबंधमोक्षचित्रांक्रीडांप्रतनोतिपर
मशिवः ॥३३॥ स्वस्यस्वात्मनस्तत्त्वलक्षणस्ययज्ज्ञानंतस्यस्वात्मन्यावगमःतस्यविभवेदेहाद्यभिमा
नविगलनेनयच्चित्स्वरूपेपराहंता चमत्कारस्वरूपस्यस्वात्मनस्पर्शोत्तानंचिदानंदैकघनःस्वतंत्रोस्मीति
तस्यबोधस्वातंत्र्यरूपस्यविभवस्यभासनंप्रकाशःसर्वोममायंविभवइतिबाह्यतयाभिमतस्यस

प्रा सं

१८

वेस्यस्वात्मन्येवस्वीकारः तस्ययोगः एवंपरिशीलनक्रमेणात्मनियद्विमर्शदार्ढ्यं एवमेतेन स्वज्ञा
नविभवभासनयोगेन निजमात्मानं नानारूपतयानन्तचैतन्यस्वभावं प्रत्यभिज्ञायते देहप्राणपुर्यष्टकशून्य
परामर्शनिगडैः यो विष्टितश्चासीत् तमेव चैतन्यस्वरूपः स्वतंत्रोस्मीति विमर्शेन पुनरपि भगवा
नेव विगतवेष्टनं करोति इत्येवं स्वातिबलादागतं स्वात्मनो देहाद्यावरणं तत्पुनरपि स्वातन्त्र्यबा
लाद्विनश्यतीति स्वविकल्पितत्वात्तदोषः इति श्रीमद्गुरुकृतातन्त्रसारेनिरूपितं यो निश्चयः प
शुजनस्य जडोस्मि कर्मसंपादितोस्मि मलिनोस्मि परेरितोस्मि इत्येतदन्यथा हृद निश्चयलाभः
सिद्धासद्यः पतिर्भवति विश्वविचिदात्मा इति किमिति बध्नाति मुंचति च भगवानित्याह इ
ति बंधेत्यादि इति प्राक्युक्तिप्रपादितेन क्रमेण भगवान् स्वतंत्रः परमशिवः पूर्णचिदानंदैकघनल
क्षणः स्वरूपगोपनस्वतन्त्रः क्रीडाशीलत्वादाख्यातिवभासनपूर्वं स्वात्मानमेव देहादिप्रमातृता
पन्नं विधाय स्वरूपं प्रच्छाद्य च बंधं विदधाति तथैव पुनः स्वेच्छातः स्वात्मज्ञानप्रकाशनक्रमेण दे
हादिप्रमातृतावंधं निवार्य स एव तं स्वात्मानं मोचयतीत्युभयथा बंधमोक्षचित्रां संसारापवर्ग
स्वरूपामाश्चर्यमयीं क्रीडाखेलां प्रतनोतिविस्तारयति एकाकीन रमे अहमितिस्वभावपरवेषदेवस्य

चेतनोस्मि कर्मीरयी
नोस्मि निर्मलोस्मि स्व
तन्त्रोस्मीति निश्चय

प॰
मा॰ वै॰
वि॰
१९
19

यत्नाता मध्यवस्थामापन्नः स्वरूपरूपः सन्सर्वत्रानुभवितृतया प्रथते इत्येतदेवस्वातंत्र्यं ३३ नकेव
लमेतदेवावदपरः कश्चिदवस्थाविशेषः स्वस्मिन्रूपे विश्रान्त एवावभासयते भगवतादृत्याह ॥ स्वा
प्निस्थितिमहाराजाग्रत्स्वप्नेष्वसुखमिति तस्मिन् भांतितुरीयधामनि तथापि तैर्नाहृतं भाति ३४
विश्वापेक्षया येसर्गादयो मायाप्रमातृगतास्तुर्येजाग्रदादयः अवस्थाविशेषाः उभयथा एतस्मिन्भ
गवति आनंदघने तुरीयधामनि वस्तुत्वेक्षूर्णाहृतामयेपदे भांति न हि श्रांताः संतः स्वरूपसत्तां कल्पि
तप्रमात्रपेक्षया बाह्यतया लभंते परमेश्वरमितो यत्न प्रकाशते तेन बाह्यतयापि न प्रकाशते अतस्त्वि
तन्तुवत्स्यूत षु च तुर्ये तैलवदसेच्यमिति सर्वास्ववस्थासु तुरीयं रूपं अनुस्यूतत्वेन स्थितमिति परमार्थः एता
एतावता तत्त्वैः स्वरूपमाच्छादितं स्यादित्याह तथापि तैर्नाहृतं भातीति इत्थमपि तैः स्वरूपसत्ता
र्थमाहृतमपि तेभ्यः समुत्तीर्णतया सर्वानुभवितृतया सर्वत्रावभासत एव न तु नस्यदावरणेन स्व
र्णस्वरूपतां तत्प्रतिरोधतु इति शिवधाम सर्वावस्थास्वपि सदैव पूर्णं ३४ वेदान्तभाषाभिर्जाग्रदादी
नां त्रयाणां स्वरूपं अवरूपं स्वदनुस्यूतमपि ततः परं तुरीयमावेदयति ॥ जाग्रद्विश्वं भेदात्स्वप्ने
जः प्रकाशमाहात्म्यात् प्राज्ञः सुषुप्तावस्थाज्ञानघनत्वात्ततः परं तुर्यं ३५ ॥ जाग्रदवस्थाएव॰

ॐ
१९

२४

विश्वं ब्रह्मणो वैराजं स्वरूपं जतः भेदात् शब्दादिविषयपंचकस्य बाह्यतया परमेश्वरस्य हृष्टस्येव सर्वा-
प्रमातृणां चक्षुरादीन्द्रियप्रवृत्तेर्विलोकस्येव ब्रह्मणो विषया विषयिभावेन स्थितस्य नानानिन्द्रिय-
ज्ञानवैचित्र्यं अत एव शिवसूत्रेषु ज्ञानं जाग्रदिति एषा ब्रह्मणो विराडवस्था गीयते यच्छ्रुतिः यो
विश्वचक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् संबाहुभ्यां नमति संपतत्रैर्द्यावाभूमी
जनयन्देव एक इति तथा स्वप्नस्तैजसावस्था ब्रह्मणः कृतमित्याह प्रकाशमहात्म्यादिति स्वप्ने ब-
हिष्करणानि शब्दादौ विषये नावतरन्ति नापि तत्र बाह्यशब्दादिकं नाम किंचित्परमार्थसा-
क्षिप्यते नापि बाह्यतयाध्यवसायस्याविद्यादि किंचिद्भिन्नमभिन्नं वा करणांतरमुपलभ्यते युक्त्या
विचार्यमाणं वोपपद्यते अथ च स्वप्ने सर्वं प्रकाशते अतः इदमर्थादयातं यत्स एव भगवान् स्वस्व-
भावो दिव्यस्तत्र प्रमातृतां समाविष्टः स्वप्नायमानः स्वात्मानमेव प्रकाशस्वातंत्र्यात् गन्धर्वनगरजालादि
अनेकप्रमातृवैचित्र्यरूपतया प्रविभज्य प्रतिप्रमातृ स्वप्ने साधारणमेव विश्वप्रकाशमावहतीति ब्रह्मणः
स्वातंत्र्यं स्वप्न एव ब्रह्मवादिभिरभ्युपगतं यत्तैर्वेदान्तेष्विदमुक्तं प्रविभज्यात्मानं स्वप्ने भावाभावान्
ध्यायन्निधानः सर्वेश्वरः सर्वमयः स्वप्ने भोक्ता प्रकाशत इति प्रकाशमहात्म्यमेवात्र हेतुः अतः स्वप्नो

मनार्थ

पर. सा. वि. २

२०

ब्रह्मणस्तेजोवस्थेति तथा प्राज्ञः सुषुप्तावस्थेति सर्वप्रमातॄणां या सुषुप्तावस्था सुषुप्तं सा प्राज्ञ इति ब्रह्म
णः प्राज्ञावस्थेति यतः सर्वप्रमातॄणां ग्राह्यग्राहकप्रपञ्चविलयात् महाशून्यतारूपे ग्राह्याद्यविलये सं
स्कारशेषे सुषुप्ते विश्वस्य बीजस्य ब्रह्मण एवं प्रज्ञा ब्रह्मप्रज्ञात्मन्यन्तरतममवस्थानमिति यावत् सर्व
स्य प्रमातुर्नीलसुखादिवैचित्र्यप्रथायामेषां संस्कारभूमिः ततः प्रबुद्धस्य प्रागनुभूतवस्तुव्यवहारदर्शनात्
अन्यथा ह्यघस्याणुभूमौ स्थिरं प्रज्ञात्स्वभावं सर्वक्रोडीकारेण ब्रह्म न प्रकाश्येत तज्जन्तस्तन्तु स्थितस्य प्र
मातुः प्रागनुभूतवस्तुन स्मृतिरेव तदित्यनुभूतचरत्वेन स्मृतिरूपत्वम् नापि सुखमहमस्वाप्सं दुःखम
हमस्वाप्सं गाढमूढोऽहमासमित्यनुभवः प्रादुर्भविष्यदिति तथा च भट्टदिवाकरवत्सः सर्वेऽनुभूताय
दिनान्तरस्थापि स्विदात्मसंस्कारसुरक्षितास्सुः विज्ञानवत्त्वं प्रतिमोषरूपा काचित्स्मृतिर्नाम न संभवेन्न त
इति इत्थं सुषुप्तं चिन्मयमेव ब्रह्मणः प्रज्ञावस्थेति गीयते अतः ज्ञानघनत्वादिति सुषुप्ततुर्ययोः
साधारणोऽयं हेतुरिति उभयत्र योज्यं एषा सुषुप्तभूमिर्ज्ञानघना प्रकाशमूर्तिः केवलं विश्वप्रलयसंस्का
रेण धूमलीमसा तुरीयचिन्मयी न भवतीति यदुक्तं स्पन्दशास्त्रे ज्ञानज्ञेयस्वरूपिण्या शक्त्या परमया यु
तः पदद्वये विभुर्भाति तदन्यत्र तु चिन्मय इति तथा ततः परं तुर्यमिति तस्मात् सुषुप्तात् परमन्यन्निःशे

Margin: भते ... धूमलीमसा ... ३ २

जाग्रत्स्वप्ने सुषुप्ततुर्ये:

अन्वर्थमितितूहार्थरूपं

अन्वर्थं

प्रणाशाद्वासनासंस्कारपरिहृतयाखण्डं पूर्णानंदमयं ब्रह्मणस्तुरीयं रूपमनुगुणं नाम यदाज्ञानान्वर्थेन
किंचिदुपपद्यते अतो व्याख्यातस्यावस्थात्रयस्य विश्रामभूतं सर्वांतरतमत्वेनानुस्यूतमिति च तत्संख्यापू
रणोऽन्वर्थमिति तुरणप्रत्ययेन संख्यावाचपदेशोऽत्र कृतः कथमवस्थात्रयस्यानुस्यूतमपि ततः परमेतदि
त्याह ज्ञानघनत्वादिति यतो जाग्रदाद्या अवस्थाः सर्वभिदप्रवणत्वात्प्रमातृणामज्ञानमय्यः तुरीयं त्व
हंग्राहककृतोऽपमलयसंस्कारपरिहृतया ज्ञानघनं प्रकाशानंदस्फूर्ति अतस्तदं ततः स्थमपि ताभ्योऽवस्थाभ्य
श्चिन्मयतया समुत्तीर्णत्वात्परमन्यदित्येवमवस्थावैचित्र्यं परमाहू य स्वभावं स्वतंत्रं ब्रह्मैव पूर्णं विश्वं भाति ३५
एवमपि शुद्धस्य परमात्मनः सर्वप्रमात्रनुस्यूतत्वेन स्थितत्वादवश्यं प्रमातृगणगतं संख्यातिमालिन्यमा
यातीति यत्तन्नेति दृष्टांतेनावेदयति ॥ जलधरधूमरजोभिर्मलिनीक्रियते यथा न गगनतलं तद्वन्मा
याविकृतिभिरपरामृष्टः परः पुरुषः २६ यथा मेघधूमधूलीपुंजैराकाशस्यैरप्याकाशं स्वरूपममलि
नं स्वभावतो न मलिनं विधीयते नापि नित्यता वैतत्य खंडनां वानीयते केवलं दर्पणप्रतिबिंबवत्त
दवस्थावैचित्र्यं गगनं गगनमेव सर्वदा तथात्वेन प्रत्यभिज्ञानात् तद्वदिति तथैव मायाविकृतिभिर
ख्यातिसमुत्थैर्विकारैर्नानाप्रमातृगतैर्जन्ममरणाद्यनेकविचित्रावस्थामयैर्भगवत्स्थैरपि भगवान्

प॰ वि॰
२२

परामृष्टः नैतेरपहततत्त्वद्वयः यतः स एव परः पुरुषः इति सर्वपुरुषाणां जीवानामाद्य उल्लासो विराडिति।
स्यानं चेति सर्वानुभवितृतया सदा स्फुरतीति परपाठेन निर्दिष्टः तस्मान्न स्वसमस्तस्यैः प्रकाशोऽद्वैयेमर्यायावि
कारैरिंद्रजालिकवद्भगवतः काचित्क्षतिरनेनेति परमेष्ठिना नरेश्वरविवेके प्रयुक्तं यद्यप्यर्थस्थितिः प्रा
णपुर्यष्टकनियंत्रिता जीवनिकृद्यातत्रापि परमात्मनि सास्थिता तदात्मनैव तत्स्वरूपस्यात्कथं प्राणेन
यंत्रणेति ॥३६॥ नन्वेकचिन्मात्रपरमार्थाश्रयिपुरुषाविशिष्टाः सुखदुःखमोहजन्ममरणादिनानाव
स्थावैचित्र्यभाजश्चेति कथमेतदिति दृष्टांतमाह ॥ एकस्मिन्घटगगने रजसा व्याप्ते भवंति नान्यानि
मलिनानि तद्वदेते जीवाः सुखदुःखभेदभाजः ॥३७॥ यथैकस्मिन्कुंभाकाशे धूलिपुंजसमाच्छादिते
नान्यानि घटाकाशानि विमलान्यपि आकाशत्वाविशेषान्मलिनानि रजसाच्छादितानि भवंति विम
लं व्यापकं नित्यमपि हि गगनं यादृशं घटसंकोचसंकुचितं भवति तादृशमेव तत्स्वरूपं च घटस्य तद्भवति न पु
नः सर्वाण्यपि घटाद्याकाशानि कलागुरुधूपितानि मृगमदाधिवासितानि [illegible]धिरगंधीनि वैकाका
शस्वरूपत्वात्संकीर्यंते स्वगतघटादिकृतविच्छेदात् प्रत्युतैकत्रापि गगने वास्तवे स्थिते घटादयः स्व
गतभित्तिसंकोचनियंत्रिताः संतो नानागगनवैचित्र्यं प्रथयंति इत्थं घटकृतसंकोच एव गगनं तथा

स्व
परमात्मनः
संवलितदाकाशे
आकाश
२२

तद्घटसंकुचितं =४

वच्छिद्यते तथात्वेनार्थक्रियाकारित्वात् न पुनर्गगनं स्वेन तत्किंचिद्घटगतं मालिन्यादि स्वरूपतिरोधाना
य भवति नापि परस्परं घटाद्यवच्छिन्नानां गगनानां व्यामिश्रणेति तद्वदिति तथैवामी जीवाः पुरुषा एक
चिन्मात्रपरमार्था अपि परमेश्वर्या मायाशक्त्या आणवमायीयशाक्तकोशत्रयावेष्टनेन स्वपूर्णव्यापि चि
दानंदैकघनं स्वरूपमपहस्त्य परिमितीकृताः येनैकचैतन्यात्मानोपि स्वगतकोशत्रयविच्छेददोरात्म्या
न्यपरस्परं भिन्ना इति घट[illegible]द्याकाशवत् इत्थं मायीयकोशकृतो विच्छेद एव जीवतया व्यवच्छिद्यते न पु
नः परमेश्वरेऽनवच्छिन्नचिदानंदैकघने जीवाः पुरुषाः आत्मानः एवमिति दर्शनांतरदृष्टेः कश्चिद्व्यवहा
ग्रंथादि ५८ रः एवमाणवादिकोशावच्छिन्ना जीवा विचित्रकर्ममलवासनाधिवासिता नानादेहा नानाशया नानापु
रुषार्था पुण्यस्वर्गनरकसुखदुःखजन्ममरणादिद्वंद्वभेदभाजस्संतो नान्योन्यं संकीर्यंते यथा नानाद्रव्या
श्रा. ५ धिवासितानि घटाद्यवच्छिन्नानि घटाकाशानीति सूपपन्नमेकचिन्मात्रपरमार्था अपि स्वविच्छेदादन्योन्य
भेदमुपयांतीति २७ इत्थं जीवमंडलगता अवस्था विशेषा ये ते केवलं भगवदुपचर्यंते न पुनः स्वतस्त
त्र ते केचिदित्याह १ घ्नंति येषां तद्वा येहृष्टेहृष्टो विमोहवति मूढः तत्वगणे मति भगवान् पुनः पारमार्थ
तः सतथा २८ १ तत्वगणे इंद्रियवर्गे घ्नंते उपरते सति मूढतः परमात्मा घ्नंतो नष्ट इवाभिमन्यते

प॰ सा॰ टी॰ २२

एवं तस्मिन् हृष्टे स्याद्धृन्नादे सति स तथैवोपचर्यते परं तमोमयं मूर्छामोहवानिति यथा स्थावरयोनौ न
पुनः परमार्थतो वस्तु हृते न स परमेश्वरस्तथा तेन प्रकारेण भवति सर्वो हि जडभागः तत्प्राधान्यः संहार्यो वा
भवति न तु न निर्विशेषे भगवति बोधस्वभावे मायादिकं तु कगति विनाशोत्पत्ती स्यातामिति भगवानादम
मः २८ समस्तमपि क्रमेणागता भ्रान्तिः पुनरप्यक्रमेणास्तरां समस्तमुन्मूलिता भवतीति अत्र स्वात्मन एव
स्वातंत्र्यमित्याह । यदनात्मन्यपि तद्रूपावभासनं तत्पुरा निराकृत्य आत्मन्यनात्मरूपं भ्रान्तिं विदल
यति परमात्मा २९ अनात्मन्यचेतनपलक्षणे देहादौ कृशः स्थूलः स्थामीत्यादिय तद्रूपावभासनमनात्म
न्यात्मतया परामर्शनं तत्तस्मिन् पुरा आदावेव निराकृत्य अहं चिदानंदैकघनोऽनवच्छिन्नस्वभावः स्वतंत्रश्च
त्वकृत्रिमाहंतास्फुरणया अकृत्रिमदेहादिप्रमातृतामपहस्त्य आत्मैव विगलितदेहबंधः परमात्मतां यातः स
न्नात्मन्यस्मिन् स्फुरद्रूपे विश्वपदार्थप्रकाशावभासांगकल्पे पि या भ्रान्तिर्देहादिप्रमातृताभिमानजनिता
भेदप्रथात्मा तां विदलयतीति अहमेवैकः विश्वात्मना स्फुरामीत्येवं चूर्णीकरोति इदमत्र तात्पर्यं यावदनात्म
नि देहादावात्माभिमानो न गलितस्तावत्स्वात्मप्रथारूपे पि जगति भेदप्रथा मोहात्र विलीयते अतस्तावाना
त्मन्यात्माभिमानभ्रमविनाशादात्मन्यनात्माभिमानभ्रान्तिं परमात्मैव स्वात्ममहेश्वरो भगवानेव विनाश

२२

८५

यतीतिनान्यस्यात्रसामर्थ्यं ॥ एवंभ्रांतिद्वयापसरणात्परमेश्वरीभूतस्य योगिनो न किंचित्कार्यमवशि-
ष्यते इत्याह ॥ इत्थं विभ्रमयुगलकसमूलविच्छेदेनकृतार्थस्य । कर्तव्यान्तरकलनाज्ञानं न परयोगिनो
भवति ॥ ४० ॥ इत्थं कारिकार्थप्रतिपादनप्रकारेण भ्रांतिद्वयस्य प्ररोहविदारणेन कृतार्थस्य स्वस्वात्म-
स्य परिपूर्णस्वरूपसंकोचविगलनात्कृतोर्थः प्राप्तः प्रकृष्टलाभो येन तस्य प्रकृष्टयोगयुक्तस्य न कदाचित्कर्त-
व्यांतरस्य तीर्थाटनक्षेत्रपरिग्रहदीक्षाजपध्यानव्याख्याश्रवणादिरूपस्य कार्यशेषस्य कलना मनोव्या-
पारोपि विद्यते अयमेव परो धर्मो यद्योगेनात्मदर्शनमिति हि स्वात्मयोगस्य प्राधान्यं अतस्तत्प्राप्त्या नान्य-
त्र परिश्रमः पूर्णयोगिनः ॥ उक्तं च यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य
श्रुतस्य चेति भगवद्गीताः ॥ संप्रति पृथिव्यादिमायांतस्य भेदावभाससंभाजो विश्वस्य भेदाभेदमयाशु-
द्धभूमिकावेशेन पूर्णप्रकाशानंदघनशांभवपदसमापत्त्याभेदविलापनेन तदभेदमयतापादनमभि-
धाय ततः शांभवात्पदात्संपूर्णस्वबोधांभोधिकल्पान्महाप्रवाहदेशीयशाक्तप्रसरोल्लासमप्यखंडितत्वेन दी-
भंगित्वयतामभिदधत्स्वानुभवसिद्धं महामंत्रवीर्यसारं समस्तभेदविलापनपरमाद्वयोदयं नरशक्तिशि-
वसामरस्यात्मकं यत्संविद्धृदयं क्रमेणोन्मीलयिष्यन्विश्वस्यागर्भिकांऽन्वयात्मतासंकलनयुक्त्यैकीकारं तावदाह

म॰
हा॰
वि॰
म॰

२३

पृथिवीप्रकृतिर्माया त्रितयमिदं वेद्यरूपतापतितं अद्वैतभावनबलाद्भवति हि सन्मात्रपरिशेषं ॥ ४१ ॥ ॥
पार्थिवप्राकृतमायीयाः एतदात्मकं यत्स्थूलसूक्ष्मपररूपं त्रिविधं वेद्यरूपतयापतितं ज्ञानगोचरतां प्राप्तं तत्तद्रू
पतया ज्ञाने बहिरन्तः प्रकाशते ज्ञानादृते नार्थसत्ता ज्ञानरूपं ततो जगत् नहि ज्ञानादृते भावाः केनचिद्विषयी
कृताः ज्ञानं तदात्मतां यातमेतस्मादवसीयते इति श्रीकालिकाक्रमोक्तन्यायेन यदद्वैतभावनं तद्बलात्प्रकर्षा
त्सन्मात्रपरिशेषं प्रकाशमानात्मकसत्तामात्रात्मकं भवति हि यस्मादर्थे ॥ ४१ ॥ ॥ एतदेव भेदस्यावास्त
वत्वप्रतिपादनाभिप्रायेणोपपादयति ॥ रथानाङ्गदकुण्डलकटकभेदत्यागेन दृश्यते यथा हेम यावद्भेदत्यागे सन्मा
त्रं सर्वमाभाति ॥ ४२ ॥ यथा किल सौवर्णस्थानाद्याभरणं सुवर्णार्थिनो स्थानादिविशेषपरिहारेण हेममात्रत
येवाभाति हेमरजतकांस्यताम्रनागादितावन्मात्रार्थिनो लोहरूपतया यावत् सर्वमिदं तत्महानन्दानादिविक
ल्पकलङ्कस्याविकल्पप्रतिभासमात्रनिष्ठस्य योगिनो रूपादिषु परिणामात्तत्सिद्धिरिति भट्टश्रीकल्लटनीत्या
भेदत्यागे सति सन्मात्रं सत्तामात्रात्मकमाभाति ॥ ४२ ॥ तदियतः सर्वस्य सङ्कोचावभासपरित्यागादागम
प्रसिद्धानररूपस्य शाक्तरूपोपारोहं मां यः संप्रदायैकदात्तयत्नमभिदधाति ॥ तद्ब्रह्म परं शुद्धं शान्तमभेदात्म
कं समं सकलं अमृतं सत्यं शक्तौ विश्राम्यति भास्वद्रूपायां ॥ ४३ ॥ तदेतत्सत्तामात्रात्मकं सर्वं दृष्टं तद्ब्रह्म यदा

दि
उ
२३

रेकै वम्रलिनइ नुक्रनीत्वा

ऊः शुद्धं तत्त्वविदः सदेवेऽस्मो मेऽस्य यश्रासीदितिं पूर्णत्वात्परं हेयोपादेयताभावाच्छुद्धं शश्वत्तोयपरामाच्छान्तं अ
तएवाभेदात्मकं प्रकर्षापकर्षाभावात्समं प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तस्याविकल्पस्येति स्थि
त्यात्मकले अतएवामृतमविनाशि सत्तासत्योभयोभागोऽप्रतिभासंव्यवस्थितो सत्तयसत्तसाजातिरसत्या
व्यक्तयः स्थिता इति यदाद्यो च यदं ते च यन्मध्ये तस्य सत्यतेति च तत्र सर्वब्रह्मार्थं हरिनिरूपितमीमांसासत्यं तदेव सत्ता
मात्रात्मकमेतत्सर्वं भास्वद्रूपायामिच्छाज्ञानक्रियारूपायां शक्तौ सामरस्यात्मिकायां परस्यां शक्तौ विश्राम्यतीति संवि
न्निष्ठा विषयव्यवस्थितिरिति स्थित्या तन्मयी भवति अथ च शान्तं शाकारस्यान्ते यन्मूर्धन्यरूपं ततः परं यदमृत
ममृतबीजात्मकं ब्रह्मसन्मात्रात्मकं सादाख्यपदस्पर्शाच्छुद्धं अतएवाहमिदं सर्वमिति सर्वसमरसीकरणात्स
मं सकलं च शुद्धं तत्त्वाख्यातिगलनात्सत्यं यदादिष्टं भगवता भवानीवल्लभेन तत्तीयं ब्रह्म [illegible] णीति श्रीत्रिशि
कायां तदित्थं ममतीभावाव [illegible] सदाशिवपदोपारूढमेतद्द्विरूपात्मकं ब्रह्म प्रागुक्तायां शक्तौ विश्राम्यति ५२
क्रियाज्ञानेच्छामुखेन परस्यां शक्तौ यन्न विश्राम्यति न तत्किंचिदित्याह ॥ ॥ रूप्यत इति वेद्यत इति संयोगत इति
च भास्वद्रूपेण अपरामृष्टं यदपि तन्नभःप्रसूनवत्सम्येति ५४ ॥ यद्वस्तु वस्तुदृष्ट्या न बहिर्विद्यमानमपि तत्
यदीच्छाज्ञानक्रियामुखेन भास्वद्रूपेण तच्छक्तित्रयसामरस्यात्मकपराशक्तिस्फारमयेन बोधेन अपरामृष्टं

इच्छाज्ञा-
यागणे:

शिवापेल:
तीयं ब्रह्म
द:=

तत्प्रख्योपाख्याविकलं गगनकुसुमतुल्यं अनेन च समहत्तत्त्वोर्ध्ववर्तित्रिशूलात्मकत्वं निवीर्यं सूचितं ॥ ४४ ॥ एतद्ध्या
नायदावेशमस्यानुवदन्मोक्षभवपदसमापत्या तन्मयीभावमाविर्भावयति शक्तित्रिशूलपरिगमयोगेन समस्त
मपि परमे शिवनामनि परमार्थे विसृज्यते देवदेवेन ॥ ४५ ॥ तदित्थं समस्तमप्येतत्सत्तामात्ररूपमात्मो
न्तब्रह्मपरमार्थं शक्तित्रिशूलपरिगमयोगेन निर्णीतं युक्त्यापरया शक्तिसमापत्तिक्रमेण शिवनामनि परमार्थे
अनवच्छिन्नचिदानन्दैकघने परमेश्वरे स्वस्मिन् स्वभावे विसृज्यते अन्तर्मुखविमर्शनप्रकर्षात् तत्समावेशेन तन्मयी
भावमापाद्यते देवानां ब्रह्मादिसदाशिवान्तानां सर्वप्रकाशानामिन्द्रियाणां च देवेन प्रभुणा परमशिवेन एवं नह्य
न्यस्य कस्यचित्कर्तृत्वं घटते नाप्यतद्व्यतिरिक्तोन्यः कश्चित्प्रमातास्ति अस्यैव हि भगवतस्तत्तद्भूमिकाधिरो
हिणस्तत्तद्ब्रह्मेन्द्राद्यात्मप्रमातृरूपतया स्फुरणमिति देवदेवेनेति युक्तैवोक्तिः तदित्थं विसर्गहृत्तिर्दर्शिता
एवमियता भेदात्मनो नररूपस्य जगतो भेदाभेदात्मकशाक्तपदाध्यारोहेणाभिन्नचिद्घनशिवसमावेशापत्ति
मुपसंहारदृशा प्रदर्श्येदानीं चिदेकघनः शिवः शक्तिरूपतयोल्लासनरात्मकविश्वरूपतया स्फुरतीति न तु शि
वव्यतिरिक्तौ शक्तिनरौ किमपि रूपं शिव एवेत्थं निजरसाश्यानतया स्फुरतीति प्रसङ्गसूक्तिमहामन्त्रस्फा
रमयीं दर्शयति ॥ पुनरपि च पंचशक्तिप्रसरणक्रमेण बहिरर्पितत् अण्डत्रयं विविक्तं स्रष्टं बहिरात्मलाभेन

चिदानंदेच्छाज्ञानक्रियाख्यशक्तिपंचकसामरस्यात्मा यः परमशिवस्तेन चिदादिशक्तिप्राधान्यप्रथनात्मक
शिवशक्तिसदाशिवेश्वरविद्याख्यभूमिकोन्मीलनमुक्त्या ततः देहत्रयं विचित्रमिति तत्तद्भुवनादिरूपं स्रष्ट्वा बहिरा
त्मलाभेनेति बाह्याभासात्मतया स्वात्मनः प्रदर्शनेन पुनरस्तीत्यनेनैतद्दर्शयति यत्परमशिव एव स्वतंत्रः सदास्व
भित्तौ विश्वप्रपञ्चोल्लासनविलापनक्रीडां स्वात्मानतिरिक्तामप्यतिरिक्तामिव दर्शयन्नेवमित्थं स्थितो न तु तद्व्य
तिरिक्तं किमप्यस्तीति ४६ इत्थं विश्वोल्लासनविलापनक्रीडाशीलो भगवान्परः शिव इति व्यपदिश्यते स कत
मः कुत्र तिष्ठति कतमेन वा प्रमाणेन सिद्ध इत्याशंक्य सर्वेषां स्वात्मैव शिवः सर्वदा सर्वत्रादिसिद्धस्तथा स्फुरन्
सर्गादीन्विदधातीत्यस्मच्छब्दवाचकैः शब्दैः प्रतिपादयति २ इति शक्तिचक्रयंत्रक्रीडायोगेन वाहयन्देवः
अहमेव शुद्धरूपः शक्तिमहाचक्रनायकपदस्थः ४७ मय्येव भाति विश्वं दर्पण इव निर्मले घटादीनि मत्तः प्रस
रति सर्वं स्वप्नविचित्रत्वमिव स्वभावात् ४८ अहमेव विश्वरूपः करचरणादिस्वभाव इव देहः सर्वस्मिन्नहमेव स्फु
रामि भावेष्वाभासरूपमिव ४९ द्रष्टा श्रोता घ्राता देहेन्द्रियवर्जितोऽप्यकर्तापि वेदांतागमतर्कांश्चित्रानहमेव र
चयामि ५० २ इतीति व्याख्यातेन प्रकारेण चिदादिशक्तिपंचकात्मिनानंतो यः शक्तिसमूहस्तं देव यंत्र
क्रीडायोगेन वाहयन्नरघट्टघटीयंत्रन्यायेन स्वेच्छयोन्मज्जननिमज्जनहेलाक्रमेण विपरिवर्तयन्नहमेवेति
देवः सर्वप्राणिनामहमित्यनाहतो नादात्मा परा हंता चमत्कारसारः स्वात्मपरामर्शः स एव सर्वस्यानपह्नव
नीयो यः स्वात्मैव देवः क्रीडाशीलः स्फुरतीत्यनेन स्वस्वरूपनिष्ठ एव शिव इति प्रतिपादितं तथा च शुद्धरूप

सिद्धांता

इति कल्पनाक्रान्तगोचरः अन्यच्च शक्तीनां करणदेवतानां विषयाहरणव्यापारादिव्यवहारस्तावत्तं यन्महाच
क्रनायकपदं तत्र तिष्ठति न तस्य: यतः करणशक्तीनां चैतन्यविश्रान्तिं विना स्वरूपसत्तैव न विद्यते अतः शक्तिम
न्तमेव स्वरूपासादनायानवरतं भजन्त इत्यनेन सर्वप्रमातृहृदयाधिष्ठातृत्वाद्भगवतो नियतभुवनाधिष्ठातृत्व
परिहृतं तथा यदिदं किञ्चिद्विश्वं तयाभिमतं तत्सर्वमादर्शप्रतिबिम्बन्यायेन मय्येव भाति व्याख्यातरूपाः
स्वदर्शविश्रान्तमेवावभासते अहंतासारमेव स्फुरतीति यावत् तथा मत्त इति पूर्णादहमिति रूपात्स्वात्मनः
सकलं निःशेषमिदं विश्वं प्रसरति प्रमातृ[illegible]मेव या बाह्यतया [illegible]स्फुरति कथमित्याह स्वप्नमिव चिद्रा
त्रमिव स्वभावादिति यथा निद्रितात्प्रमातुः स्वभावस्यायाबाह्यपदार्थाभावेपि पुरप्राकारदेवगृहादिनाना
रूपं स्वप्नपदार्थवैचित्र्यमविद्यादिपरिकल्पितकारणान्तराभावात्स्वसंविदुपादानमेव प्रसरति न त्थैव तीर्थात
रनियतमितकारणानुपपत्तेरनवच्छिन्नचिदानन्दैकघनादहमिति रूपाद्विश्वमिति तथाहमेव विश्वरूप इत्या
दि अहमित्येवं यः स्फुरितस्तत्परामर्शपरिपूर्णवानस्मि नानादेहादिप्रमातृतासमापन्नो विश्वरूपः आगोपाल
बालाङ्गनादिष्वंतर्भेदेन स्फुरणाद्विश्वानि ममैव रूपाणीति यावत् कइव करचरणादिस्वभावो देहइव य
था सामान्येन सर्वेषामेको देहः करचरणादिस्वभावः प्रतिप्रमातृत्वालक्षणेन नानारूपस्तथैवैकश्चैतन्य
लक्षणः पदार्थः सर्वो वा समस्ताद्विश्वरूप इति तथा सर्वस्मिन्प्रमातृप्रमाणप्रमेयरूपेस्मिन्नहमेव स्फुरामि स
र्वस्य स्वात्मावभवितृत्वेन प्रकाशनात् कथं भावेषु भासस्वरूपमिवेति यथा नानावस्तुषु भास्वद्रूपमतिशये

अविद्यादिक
म॰ स्वैः परिक
ल्पितं स्वतःकार
णान्तर

श॰ न्तात्तर

श्री
२५

सुषुप्तिमर्ज्ञोमरणः

नद्योतनशीलं वस्तु देदीप्यते तत्रैव जडेऽस्मिन् जगत्येकश्चिद्रूपोऽहमिति अन्यस्य दृष्टेत्यादि देहेन्द्रियवर्जितोऽपि चिन्म-
त्वादहमेव पश्यामि शृणोमि जिघ्रामि रसयामि स्पृशामीति सर्वत्र पूर्णोऽहन्ताविश्रान्ते कृतकृत्वाद्देहेन्द्रियव
र्गो हि पश्यामीत्याद्यभिमन्यते यत्स्वापाद्यवस्थासु तदस्फूर्त्याद्यभावात् तस्माद्देहेन्द्रियादिवर्गसमुल्लासक
त्वाद्वर्जितोऽपि चिदानन्दैकघनः सर्वभूतहृदयान्तरचारी विषयोपभोगभोक्ता सन्नुक्तवाच्यः परः पुरुष एव
तथा च श्रुतिः अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमा
हुरग्र्यं पुरुषं महान्तमिति तथा कर्तापि सिद्धान्तागमेत्यादि स्वयमविधातापि देवमनुमनुष्याद्याभ्यायावि
ष्टः संक्षेपविस्तारविवर्तात् प्रतिभास्वरूपोऽहं सिद्धान्तादीनां नानाकृत्यं करोमि न तु तज्जडानां लोष्टस्थानीया
नां तत्करणाशक्यमिति तत्तद्व्यवधानेनाहमेव सर्वप्रमाणनिर्मातेत्यनेन परा हन्तास्वरूपस्यात्ममहेश्वर
स्य सत्तायां न प्रमाणोपयोगः उपपद्यते उपयुज्यते वेत्युक्तं स्यात् एवमनपक्कवनीयोऽहमित्येवानुभवितुः
या सर्वैषां स्वात्मैव शिवः सर्वत्रावस्थितः सर्वप्रमाणाद्यादिसिद्ध इति ५० ॥ तदेवं व्याख्यानेन क्रमेण
सर्वमिमायं विभवद्धति दार्ढ्येन स्वात्मानं प्रत्यवमृशतां न्यस्तब्रह्मस्वरूपो योगी भवतीत्याह ॥ द्वयं द्वैतविकल्पे
गलिते प्रविलिप्य मोहनी मायां सलिले सलिलं क्षीरे क्षीरमिव ब्रह्मणि लयी स्यात् ५१ अनेन प्रकारेण सा
र्वाहंभावपरिशीलनयुक्तयाद्वैतविकल्पे गलिते भेदप्रथायां विलीनायां मोहनीमायां प्रविलाप्य नात्मन्या
त्माभिमानरूपामख्यातिं भेदप्रथाहेतुमहमेव विश्वात्मेति संकोचापसारणेन समस्तं तज्ज्ञानी ब्रह्मणि

र्जितोऽपि

न्या^

तस्मा^

देवाद्यौपा
धव्यवधानेन

हकात्मके पूर्णे चिदानन्दैकघने स्वरूपे लयी स्यात् संकोचविलयाद्ब्रह्मणा तादात्म्यं यायात् किंवदित्याह सलिल
इत्यादि यथा सरःसमुद्भूतं नानाघटादिभिर्जलं क्षीरं वा विविधशरावलेयबाहुलेयाद्यनेकगोसहस्रसंभिन्नमु
नरपि घटशरावलेयादिहातभेदसंकोचपरित्यागात्सलिले सलिलं प्रविष्टं क्षीरे क्षीरं वेत्येकमेव तत्स्यान्न तत्र
भेदः स्फुरति तथैव देहप्राणपुर्यष्टकशून्यात्मकप्रत्ययमपहाय ब्रह्मण्येव संपद्यते यथाह भट्टदिवाकरवत्सः
जाते देहप्रत्ययद्वीपभंगे ग्राम्यैकध्ये निर्मले बोधसिंधौ अध्यावर्त्यैर्विन्द्रियग्राममन्तर्विश्वात्मायं नित्यमेको विभा
सीदिति कालनास्तोत्रे ॥ एवं ब्रह्मसत्तामधिरूढस्य योगिनोऽहं ब्रह्माभिभुवोपि ब्रह्ममय एव न स्वस्वरूपविप्रलो
पायप्रगल्भत इत्याह इत्थं तत्त्वसमूहे भावनया शिवमयत्वमभियाते कः शोकः को मोहः सर्वं ब्रह्माव
लोकयतः ५२ ॥ इत्थं निर्णीतेन प्रकारेण गलितकंचुकबंधस्य योगिनस्तत्त्वसमूहे भूतविषयेन्द्रियव्राते ।
भावनया सर्वमिदमेकात्म्यसंविदिति दृढप्रतिपत्त्या शिवमयत्वमभियाते परमाद्वयरूपतां प्राप्ते शोकमो
होपलक्षिताऽहं ब्रह्माभिभवाः सर्वमिदं तत्त्वव्रातं ब्रह्म पश्यतोऽस्य न केचनैव ते ब्रह्ममयत्वात्सर्वे स्वस्वरूपरूपा इति
न खेदाय प्रभवंति ॥ ५२ ॥ ननु परमाद्वयरूपस्यापि ज्ञानिनोऽवश्यं स्थिते शारीरे पितद्धेतुकशुभाशुभक
र्मफलसंचयः किमिति न स्यादिति परिहरति कर्मफलं शुभमशुभं मिथ्याज्ञानेन संगमादेव विषमो हि
संगदोषस्तस्करयोगोऽप्यतस्करस्येव ५३ ॥ अश्वमेधब्रह्महननादिरूपशुभाशुभकर्मफलप्रचयसं
चयो मिथ्याज्ञानेन संगमादेव प्रादुर्भवति अहं शरीरी इदमश्वमेधादि ममोपायतया स्थितिर्यदनात्मन्या

उँ
२६

सवो॰ देहे

त्माभिमानस्पूर्वमात्मन्यनात्माभिमानलक्षणं वैपरीत्येन ज्ञानं तेन योसावभिष्वंगस्तस्मादेव पशोः शुभा
शुभकर्मफलसंचयो येनानवरताधिवासितः संसारक्लेशभाजनं भवति ननु ब्रह्मात्मकस्यापि प्रमातुः
किमित्येतावता पशुत्वमायातीत्यत्रार्थांतरमुपन्यस्यति विषमो हीत्यादि यस्मात्संगदोषः सर्वथा विष
म्यः यथा साधुयोगोत्तमसाधोरपि स्वगतदोषसमर्पणं कुरुते तथैव वस्तु दुष्टस्यापि प्रमातुरत्यातिजनि
तो मोहयोगः पशुत्वमापाद्य शुभाशुभकर्मसंबंधं ददाति ५३ ॥ जन्ममरणाद्यपि न ब्रह्मात्मनः स्यादि
ति नो यदि तु मायया प्रमातुरेण मैवेत्याह लोकव्यवहारस्कृतां य इहाविद्यामुपासते मूढाः ते यांति जन्म
मृत्यु धर्माधर्मार्गलाबद्धाः ५४ ॥ ये प्रमातारो देहात्माभिमानिनो भूत्वा फलकामनाकलुषिता लोका
चारस्वरूपां पुण्यापुण्यमयीमविद्यां भेदप्रथात्मिकां मायां जगति स्वर्गनरकादिफलप्राप्त्युपायत्वेन सेवंते
ते मूढाः प्रसक्ताः पुण्यापुण्यनिगडबद्धास्तत्फलोपभोगाय पुनः पुनर्जायंते म्रियंते चेत्यनवरतसंसारक्ले
शभाजो भवंति न पुनः प्रक्षीणमोहावरणो विगलितधर्माधर्मबंधो ब्रह्मस्वभावो योगी जायते म्रियते
चेति ५५ ॥ एवमविद्योपार्जितान्यपि कर्माणि ज्ञानाविर्भावादेव क्षीयंते नान्यथेत्याह ॥ अज्ञान
कालनिचितं धर्माधर्मात्मकं तु कर्माखिलं चिरसंचितमिव तूलं नश्यति विज्ञानदीप्तिवशात् ५६ ॥

अज्ञानकाले कृत्रिमप्रमातृताभिमानावसरे शुभाशुभरूपं कर्म शुभाशुभफलप्रार्थनया यत्संचितं स्वीकृतं
तद्धि ज्ञानदीप्तिवशाद्धि विशिष्टज्ञानदीप्तिवशात्प्रणश्यति अग्नेरिव प्रबुद्धेऽपि कृत्रिमप्रमातृतादाहसमर्थविज्ञा
नतस्य योऽयोनुः पुनरेव न प्रत्यवमर्शनात्मभा तत्सामर्थ्यात्तद्दर्शनं याति किमिवेत्याह चिरसंचितं तूलमि
व यथा चिरसंचितं तूलं हेमरोम वह्निप्रदीप्तिवशाज्झटित्येव भस्मसाद्याति तथैव सर्वकर्मफलप्रचयो
विज्ञानवह्निसामर्थ्यात्क्षणमध्ये प्रलयमुपगच्छतीति यद्गीतासु यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽ
र्जुन ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति न केवलं प्राक्कृतं कर्म ज्ञानप्रसादात्प्रलीयते यावदिदा
नींतनमपि कर्म ज्ञानेनेत्याह ज्ञानफलोपभोगाय पर्यवस्यतीत्याह ॥ ज्ञानप्राप्तेः कृतमपि न फलाय यतो
ऽस्य जन्म कथं । गतजन्मबन्धयोगो भाति शिवार्कः स्वदीधितिभिः ॥ ९६ ॥ सामान्यमहेश्वरमत्यवमर्शप्रबुद्धस्य कृ
तमपि शुभाशुभादिकं कर्म कृत्रिमप्रमातृताभिमानाभावान्न शुभाशुभफलदानाय प्रगल्भते इति कर्मफला
भावात्तदुपभोगयोग्यस्य जन्मनः केन प्रकारेण संभावना स्यात् भवियोगिनः पुनर्जन्मेत्यर्थः नन्वस पिंडपातात्पुन
र्न जायते चेत्तर्हि कीदृशः स्यादित्याह गतजन्मेत्यादि गतो जन्मरूपस्य बन्धस्य योगः संबन्धो यस्य स एवमिति
प्रक्षीणमोहावरणः स्वदीधितिभिः स्वरश्मिमरीचिनिचयैः शिववत्सूर्यो वर्क इति भाति स्फुरति न तु पुनः संसारोऽन्तरस्य

विकल्पितोस्य मोक्षः अत्र चित्प्राप्तिरिति केवलं मायादिकंचुककृतसंकोचविनाशात्स्वशक्तिविकस्वरता
मापद्यते इति ॥ ५६ ॥ अत्रैव युक्तिमाह ॥ तुषकंचुककिंशारुकमुक्तं बीजं यथांकुरं कुरुते नैव तथा म-
लमायाकर्मविमुक्तो भवांकुरं ह्यात्मा ॥ ५७ ॥ यथा किंशारुकतुषकंचुकेभ्यः पृथक्कृतं शालिबीजं बीजस्व
भावकिंशारुकादिसामग्र्यभावात् क्षितिजलातपमध्यवर्त्यपिहितं नैवांकुरजननलक्षणे कार्ये हि क्षमं भवति
तथैव कंचुकस्थानीयेनाणवमलेन तुषस्थानीयेन मायामलेन किंशारुकरूपेण कर्ममलेन च मुक्तः
पृथक्कृत आत्मा चैतन्यं मलत्रयरूपसामग्र्यभावात्पुनर्भवांकुरं संसारप्ररोहं विदधातीति केवलं विगलितना
नापदार्थसार्थप्रादुर्भावविनाशो वेद्यशून्यस्वात्मनि परमेश्वर एव भवति ॥ ५७ ॥ एवं ज्ञानाग्निदग्ध
कंचुकबीजस्य ज्ञानिनो न किंचिच्छंकास्थानं हेयोपादेयं वेत्याह ॥ आत्मज्ञो न कुतश्चन बिभेति सर्वं हि
तस्य निजरूपं नैव च शोचति यस्मात्परमार्थे नाशिता नास्ति ॥ ५८ ॥ य आत्मज्ञः स्वात्ममहेश्वरत्वात्म
वित्स न कुतश्चन बिभेति न च कस्मादपि परतः शत्रोः प्राणिभ्यो वा भयमादत्ते कुत एतदित्याह सर्वं हि तस्य नि
जरूपमिति यतस्तस्य स्वात्ममहेश्वराद्वयवादिनः सर्वं पदार्थजातमिदं विश्वं निजस्य स्वात्मनो महाप्रका
शैकवपुष एव रूपमाकारः सर्वत्र प्रकाशानुगमादिति प्रकाश एव स्वातंत्र्यात्स्वपरात्मना प्रकाशते अत एव

५८

प· सा· वि· ५८

भयस्थानं वा लोके यत्किंचित्प्रतिभाति तत्तस्य तदेव स्वांगकल्पमेव कथं भयजनकं स्यात् यद्धि तस्मादात्मनो व्यतिरि
क्तः पदार्थो भयहेतुर्भवेत् कः पुनः सर्वतः परिपूर्णस्यावधिभूतो भिन्नो यं मादिर्क्षित तस्माज्ज्ञानी अपहस्तितदे
हात्ममानितो पि विबिभियादिति सर्वत्र निजरूपोपलब्धेः संसारस्थितो प्येककोऽविगलितस्वपरविभागतया निः
शंको विचरत्येव यथोक्तं परमेष्ठिपादैः "यो विकल्पमिदमर्थमंडलं पश्यतीश निखिलं भवद्वपुः स्वात्मपक्षप
रिपूरिते जगत्यस्य नित्यसुखिनः कुतो भयमिति ग्रंथकारोप्याह एककोहमिति संस्थितो जनस्त्रासमसाहस
रसेन विद्यते एककोहमिति कोपरोस्ति मे ह्यहमस्मि गतभीर्व्यवस्थित इति अनेनैव च शोचतीत्यादिनाप्या
त्मज्ञः शोचति यथा धनदारादिकं मम नष्टं रिक्तोस्मि व्याधिनाक्रांतोहं म्रिये वेत्यादि यज्ञो व्याख्यातः न क्रमेण प
रमार्थे तात्त्विके वस्तुनि चैतन्यरूपेंतर्मुखे प्रमातृमात्रे नाशितात्त्वयधर्मित्वेन विद्यते सर्वं ह्यभिमानसारं कार्य
त्वेन प्रतिभासमानमिदं तावच्छिन्नरूपं त्पद्यते लीयते च न पुनः संविन्मयस्यात्मनोऽहंतासारस्याकृत्रिमस्य स्व
तंत्रस्य कार्यान्तर्मुखप्रयत्नानुपलब्धेः न चैतावता स्वरूपविप्रलोपः स्यादिति विमृशतो योगिनो देहस्थस्या
पि तद्वेत्त्वकः शोकाद्याविर्भावः स्वरूपाच्छादकत्वेन न भवेदिति ५८ नापि स्वात्ममहेश्वरस्वरूपपरिशील
नार्थादस्य ज्ञानिनः श्वेतसःक्षणतादिदोषः स्यादिति प्रतिपादयति श्रुतिशतगहृदयगं जप्रतन्नपरमार्थर

त्तसंचयतः अहमेवेति महेश्वरभावेन का दुर्गतिस्तस्य ५९ ॥ अतिगूढमतिशयेन गुप्तं हृदयमेव गंजं
सर्वपरमार्थरत्नसद्रूपविश्रान्तिस्थानस्वभावं भाण्डागारं तत्र यो तितीव्रतमस्समाश्वाससंप्रदृढः परमार्थः सद्गुरू
पदिष्टः स्वात्मज्ञानसतत्त्वः स एव सर्वविभूतिहेतुत्वाद्रत्नसंचयस्तद्वरत्नसंचयस्तेन हेतुना अहमेवेति सर्वमि
दमस्मीति यत्राविभूतिः पूर्णः पराहंताविश्रान्तिलक्षणो महेश्वरभावः शारीरिणोऽपि स्वात्मप्रकाशस्वात
न्त्र्यं तस्मिन् स्थिते सति को नाम वराकी दुर्गतिर्दारिद्र्यप्रभावः स्तदुपलक्षितो वा कश्चित्कृत्रिमो विभूत्यप्रतिघा
यः स्यात् आभाससाराद्धि सर्वपदार्थाधिदेवाभासन्ते तत्तदेव योगिनः स्वात्मकल्पाः संतः कथमुत्कर्षापकर्षा
दौ प्रगल्भन्त इति न किंचिद्दौर्गत्यादिकं भवेत् कस्येति को वास्य दुर्गतेः समाश्रयः देहाद्यात्ममानिनो हि
स्याभवं त्वयतस्तेन व्यतिरिक्तस्पेक्षणीयस्याप्राप्त्येश्वराः तदपहारादिका दुर्गतियः पुनरकृत्रिमाहंतात्मत्वविमर्श
परमार्थो ज्ञानी सर्वमस्मीत्यव्यतिरिक्तमेवेक्षणीयेन महेश्वरः स कथं व्यतिरिक्तप्राप्त्यप्राप्त्यभावाद्दौर्गत्यादेर्भा
जनं स्यात् अत एव गंजपादस्य रत्नसंचयपादस्येश्वरपादस्य च हृदयप्ररूढपरमार्थमहानित्यः कृत्रिमा
र्थवाचकानि विशेषणानि स्वरूपपादिन्तानि ५९ ॥ इदानीं मोक्षस्वरूपमाह ॥ मोक्षस्यनैव किंचिद्धामा
स्ति न चापि गमनमन्यत्र अज्ञानग्रन्थिभिदा स्वशक्तिभिर्व्यक्तता मोक्षः ६० ॥ मोक्षस्य पराहंताचमत्का

दुर्गतेराश्र
याभवं च

हृदयादीनि:

बच्छं तन्न यस्य ह
पादित्रयं कृ
माद्विशेषणानि

स्मारस्यकेवलस्यधामव्यतिरिक्तंस्थानंनविद्यतएवंदेशकालाकारावच्छेदाभावात् अतएवनचाप्यन्य
त्रऽत्रचिद्व्यतिरिक्तेगमनंलयोमोक्षः यथाभेदवादिनांमतेनोत्क्रांत्याज्ञाचक्राधारादिभेदनादूर्ध्वद्वादशां
तेलयएषैवमुक्तिरितियदुक्तं व्यापिन्यांशिवसत्तायामुत्क्रांत्याकिंप्रयोजनं अव्यापिनिपरेतत्त्वेपुत्क्रां
त्याकिंप्रयोजनं इति एवंविधाअप्यन्येऽपितीर्थांतरपरिकल्पिताबहवोमोक्षभेदाः संतितेअतन्यमानाग्रंथगौ
रवभयमानयेतीतिनेहप्रतन्यंतइति सर्वत्रद्वैतमलस्यसंभवादमोक्षेमोक्षलिप्सामोक्षाभासएव किंतु
तमोक्षलक्षणमित्याह अज्ञानेत्यादि अज्ञानमख्यातिजनितमात्मन्यनात्माभिमानपूर्वमनात्मनिदेहा
दावात्माभिमानलक्षणोमोहः सएवपूर्णस्वरूपसंकोचदायित्वाद्ग्रंथिरिवग्रंथिः स्वस्वातंत्र्यलक्षणस्यनि
जस्यव्यापित्वादेर्देहाद्यभिमानतयाबंधः तस्यभिद्वेदनंनिजपूर्णस्वात्मस्वातंत्र्यपरिशीलनदार्ढ्याद्देहा
द्यभिमानलक्षणस्याज्ञानग्रंथेर्विदारणंतेनहेतुनास्वशक्तिभिः स्वात्मस्वातंत्र्यलक्षणैर्धर्मैर्व्यक्तता स्वा
त्मशक्तिविकस्वरताएषएवनिरतिशयोमोक्षइति अयमाशयः यथासहजनित्यव्यापकत्वादिधर्मयुक्त
माकाशमपिघटादिभिर्निबंधसंचितंततएवतदेवाव्यापकत्वादिधर्मयुक्तंघटाकाशमित्युच्यते आका
शाच्छिन्नमिवप्रथतेपुनरपिघटादिभिन्निक्तेतत्संकोचभंगात्तदेवघटाद्याकाशंतदेवव्यापकत्वादिधर्मयु

तं स्यान्न पुनस्तस्य घटादिभंगान्न तु तनः कश्चिद्धर्माविर्भावः प्रयातीति तद्वदेव देहाद्यभिमानकृतसंकोचसंकुचि
तचैतन्यबद्धमिवेत्युच्यते तदेव पुनः स्वस्वरूपज्ञानाभिव्यक्तेर्देहादिप्रमातृताबंधस्तयात्मस्वरूपाभिविकस्वरंस्व
क्तमिवेत्यभिमानमात्रसारोपरिमितप्रमातृरूपेतया बंधमोक्षौ न पुनः परमार्थे संविदि तत्त्वे एवं किंचिन्न भवती
तीति तस्मान्मुक्तो न किंचित्साध्यते निजमेव स्वरूपं प्रथते एतदेव विष्णुधर्मेष्वप्युक्तं यथोदपानकरणात्
क्रियते न जलांबरं सदेव नीयते व्यक्तिमसतः संभवः कुतः भिन्ने हतौ यथा वायुर्नैवानन्यः सह वायुना क्षीण
पुण्यपापबंधस्तु तथात्मा ब्रह्मणा सदेति ८९ । एवं प्रक्षीणाज्ञानबंधो ज्ञानी परानुग्रहार्थं शारीरं धारय
न्मुक्त इत्यावेदयति । छिन्नाज्ञानग्रन्थिर्गतसंदेहः पराकृतभ्रान्तिः प्रक्षीणपुण्यपापो विग्रहयोगेप्य
सौ मुक्तः ९० । शारीरसंबंधेपि स्वात्मज्ञानविच्छुरितत्वाद्यभिमानाभावाज्जीवन्नपि मुक्तो विकस्वरशक्तिर्भवि
त् ननु विग्रहयोग एव बंधः कथं तत्संबंधेप्यसौ मुक्तः स्यादित्याह भिन्नेत्यादि भिन्नो विदारितस्त्वज्ञानरू
पो ग्रंथिरपूर्णत्वख्यातिसमन्वयो देहाद्यात्माभिमानरूपो बंधो येन स एवं तथा गतसंदेह इति अत एव
न हि संशयः पराकृता नष्टा भ्रान्तिः परमाद्वयज्ञानलाभाद्भ्रान्तिः द्वयरूपो भ्रमो येन स तथेति एवं परिशी
लनेन प्रक्षीणानि पुण्यपापानि विगलितसंस्काराणि देहात्ममानिताभावाद्धर्माधर्माणि यस्य स एव

६०

प॰ सा॰ वि॰ ४०

बंधश्चेत्यनेनाज्ञानमेव बंध इति प्रतिपादितं तत्त्वविग्रहयोगेपि यस्य प्रक्षीणं मतं देव जीवन्नेव विमुक्तो
न पुनः शरीरयोगो बंधस्तदपगमो मुक्तिरिति किंतु देहपातान्तरं मोक्ष इति ८१ जीवन्मुक्तस्य कर्मदेहो
शरीरस्थितेपि शरीरयात्रामात्रार्थं ज्ञानेद्धं ऊर्वरितस्य कर्मण न फलाय तस्य भवतीत्यत्रोपपत्तिमाह ॥
अग्न्यभिदग्धं बीजं यथा प्ररोहासमर्थतामेति ज्ञानाग्निदग्धमेवं कर्म न जन्मप्रदं भवति ८२ वह्नि
निर्दग्धं शालिबीजं क्षितिसलिलातपसमग्रावस्थायामपि सामग्रीवैकल्याद्यथाङ्कुरादिजनने शक्तत्वं याति तथै
व ज्ञानाग्निना दग्धं परमाद्वयबोधदीप्त्या लुप्तं कर्म यथाहमेव कार्यं विश्वात्मना स्फुरामीत्येवं रूपेण देहा
द्यात्ममानिताहानेर्हेयोपादेयबुद्धिपरित्यागेन यत्किंचिच्छुभाशुभं कर्म क्रियमाणं तद्धृष्टवीर्यं न पु
नर्ज्ञानिनः पिंडपातादनंतरं जन्मफलदं भवति देहनिर्माणहेतुः संपद्यते दग्धं बीजमिवाङ्कुरे तस्मा
न्न सर्वाहंभावरूपाया ज्ञप्तिशक्तेरफलाभिसंधानतया कृतं कर्म भूयो जन्मदातृ प्रभवतीति ८३
एवं पुनर्विकस्वरापि चितिशक्तिः कथं कारं देहवती स्यादित्याह परिमितबुद्धित्वेन हि कर्मोचिता
भाविदेहभावनया संकुचिता चितिरेतद्देहबंधमेत तथा भवति ८४ यस्मात्परिमितबुद्धित्वेनाख्या
तिजनिते न देहाद्यभिमानवासनापूर्वककामनाकालुष्य निष्प्रयेन यत्कृतं कर्म यथाहमस्य मेयेन

यत्रेद्दह्याश्चयत्र स्वखीभूयात्संमा कदाचनङ्खव्यहंभूयां, अस्तुनाकर्मणाविपेंद्रपदमाप्स्यामित्येवंवासना
विशिष्टस्यकर्तुरेवमन्तेगुणं कर्मतस्यमनोवासनालब्धप्ररूढेः कर्मणाउचितस्तदनुगुणफलभोक्तृता
योग्योसोभावीदेहः आरब्धकर्मफलभोक्तृशरीराधिकारपरित्यागाद्यनन्तरं भविष्यच्छरीरं तस्यचाभा
वनात्स्तनाश्वमेधादियज्ञकर्मणासाम्राज्याद्याप्स्यामीत्यभिमतकर्मफलवासनाधिरूढचित्तस्ताकर्मोचि
तभाविदेहभावनयाइयं सर्वतः पूर्णापि चितिशक्तिराणवमायीयमलमूलेन कार्ममलेनाघ्राता संकु
चिता व्यापिन्यपि घटाकाशवत् कर्मानुगुणफलभोक्तृशरीरवासनावच्छेदवती संपन्ना सती एतद्देहध्व
संततथाभवतीति एतस्य प्रारब्धस्य कर्मफलस्य योभोक्तादेहस्तस्य भोगपरित्यागाद्योध्वंसोमृतिस्तस्मिन्दे
हध्वंसे सतिसाचितिरूढ्हस्तकर्मवासनातथाभवति येनाशयेन पूर्वं कर्मफलमुपार्जितं तत्तत्कर्मफलभो
क्तायोदेहस्तद्वतीसंपद्येतेयद्वशाच्चितिरपिस्वर्गनरकादिभोगभाजनं स्यात् तस्माच्छरीरीभूत्वापरिमित
फललोल्याद्यत्कृतं कर्मतत्फलभोक्तृजन्मदातृमेवधर्मप्रभवति यत्तुनरशरीरीभूत्वा सर्वंब्रह्मास्मी
तिसंविद्रूपतयाकृतं तद्वासनाप्ररोहानास्मादनात्कथंव्यापिन्याश्चितिशक्तेर्जन्मनेस्यादितितात्पर्या
र्थः ६८ ॥ एवमनात्मतयासमुपचितं कर्मसंसरणाय प्रमातुर्भवतीतिचेतर्हात्मस्वरूपं वक्तव्यंये

नी ४

-कर्म

नमदातंतमयं

प॰
सा॰ ध॰
वि
३१

नसंसारीनस्यादितिप्रतिपादितमपिपिशाचजनहृदयंगमीकर्तुंपुनःकथयति ॥ यदिपुनरमलंवोधं
सर्वसमुत्तीर्णवोधकर्तृमयं विततमनस्तमितोदितभारूपंसत्यसंकल्पं ॥६४॥ दिक्कालकलनविक
लंध्रुवमव्ययमीश्वरंसुपरिपूर्णं बहुतरशक्तिव्रातप्रलयोदयविरचनैककर्तारं ॥६५॥ सृष्ट्यादिविधि
सुवेधसमात्मानंशिवमयंविवुध्येत कथमिवसंसारीस्याद्विततस्यकुतःक्ववासरणं ॥६६॥ य
दिपुनःपराशक्तिपातविद्धहृदयःप्रमातादेहादिप्रमातृताभिमानमधस्पदीकृत्यस्वात्मानंशिवमयंवि
वुध्येतचिदानंदैकघनंविजानीयात् सपरिज्ञातस्वात्ममहेश्वरभावःकथमिवकेनप्रकारेणयथासंसा
रीसंसरणशीलोभवेन्नस्यादितियावत् यतश्चिद्विद्रूपःपुर्यष्टकात्माकार्ममलसंवंधेनसंसरतियः
पुनश्चिदेकमूर्तिःशिवमयःप्रक्षीणाणवमलादिकंचुकःसकथंसंसारीतितात्पर्यं ननुचिदेकमूर्तेः
स्यात्संसारीत्वभवेदितिकिंदुष्टमित्येवंमाशंक्याह विततेत्यादि विततस्यानवच्छिन्नदेशकालाकारस्य
प्रमातुर्देहाद्यभिमानपूर्वसंस्कृतवासनापरिक्षयात्पूर्णस्यतस्यकुतःसरणं सर्वव्यापित्वात्तदतिरिक्तंकि
मस्तियद्धस्तमपेक्षततोविश्लिष्टोऽन्यत्रभिन्नेसंसरणंगमनंकुर्यात् यतोदेहादिप्रमातृताभिमानावच्छिन्न
स्यकिलापादानाधिकरणादिकारकसंभवः यःपुनश्चिदेकघनोब्रह्मभूतोनवच्छिन्नदेशकालःप्रमाता

मे

ॐ
३१

तस्यसंस्मरणेवाचोयुक्तिरपिनभवेदितिकीदृशंतंशिवतत्त्वरूपमात्मानंविबुध्येतेत्याह अमलंबोधमित्यादि
अपगतआणवमलादिप्रचयोयस्यतं अतएवविमलत्वाद्बोधंशुद्धचैतन्यं तथासर्वसमुत्कीर्णनिरतिशय
ज्ञानक्रियास्वातंत्र्यप्रकृतंतयस्येतितंततं विततंदेशादिकृतविच्छेदाभावाद्व्यापिनं तथाविद्यमानेस्तमितो
दितेप्रलयोदयौयस्यभासोबोधदीप्तेःसेवत्तरूपंदेहोयस्यतं अन्यच्चसत्याःपरमार्थ्याःसंकल्पाःस्वेच्छाविहारा
यस्ययद्यदिच्छतितत्तथैवभवतीतितमेवंविधं तथादिकालाकारकलनाभिश्चर्चाभिर्विरहितं व्यापित्व
नित्यत्वधर्मयोगात् अतएवध्रुवंकूटस्थंअव्ययमविनाशिनं तथेश्वरंस्वतंत्रं अन्यच्चतथासर्वपरिपूर्णत्वान्
निराकांक्षं तदनुबद्धतराणिप्रसूतानिप्राकृत्यानिमायानिब्राह्मयादिशक्त्यधिष्ठितानिघटपटादियोनि
ज्ञातानितेषांलयोत्पत्तिविधौस्वतंत्रं अन्यच्च सृष्ट्यादिविधिस्तद्विध्वंसं प्रवीणंविधातारमित्येवमादिविशेष
णैःसर्वतःपरिपूर्णंस्वात्ममहेश्वरंजानानोयत्किंचिदपिकुर्वाणोदग्धकर्मबीजोनपुनःसंसारभाक् जीवन्ने
वविमुक्तोभवेदितियावत् ९९ एवंस्वात्मप्रत्यवमर्शोपपन्नस्यज्ञानिनाविगलितकर्माभिलाषेणकृतम
पिकर्मनफलायेत्यावेदयन्स्वानुभवसिद्धंलोकदृष्टांतमाह इतियुक्तिभिरपिसिद्धंयत्कर्मज्ञानिनोनस
फलमित्तितिव नममेदमपितत्तस्येतिदार्ढ्यतो नहिफलेलोके ९० १ अहमेवचिद्घनःस्वतंत्रःसर्वप्रमा

त्रिशिर्विशे
षकश ८

नद १

प० सा० म२

र्द

ग्रांतुरतमत्वेन सर्वकार्यकारी नाहं वा कर्त्ता यात्परमेश्वरी शक्तिरित्थं करोतीति मम ज्ञस्य चैतन्यस्वरूपस्येतावता किमा
यातमित्युक्तिभिः प्राक्प्रतिपादितस्वरूपाभिरुपपत्तिभिर्व्याख्यातस्यात्मस्वरूपविदः प्रमातुरुभयथा देहा
द्यहंभावाभावाद्धेयोपादेयशून्यत्वेन यत्किंचित्कर्म निष्पन्नमपि कृतं तेन तत्फलेन तत्फलेन न युज्यते तस्यात्मज्ञा
निनः प्रतिपादितवदुभयथा कृत्रिमत्वाभावात्कृतमपि कर्मजन्यफलेन योगं कुर्यात् देहादिष्वात्माभिमानस्य
भावाश्रयाभावान्न कुत्रचिदिति यावत् कृतस्य कर्मणो यात्प्रमातुः फलाभिमानवृत्तिरेवाश्रयो ज्ञानिनस्त
दभिमानाभावात्स्वस्मिन्स्वरूप एव प्रलीनः कर्मफलेन युज्यते संबध्यत इति ननु अभिमानादेव कर्मफलेन युज्यत
इति कुत्र दृष्टेत्याह नममेदमपीत्यादि हेहे चेतन्नात्र सर्वदृश्यां न ममेदं यज्ञादिकं कर्म अपि तु तस्य कस्यापि इति तव
तो यजमानस्येत्यनया बुद्ध्या कृतमपि यज्ञादिकं कर्म लोके मूल्यार्थितया फलाभिमानाभावान्न यतः स्तत्क
र्मपारलौकिकेन फलेन युक्तं कल्पते तथाहि यजंति याजकाः यजंति यजमाना इति न्यायेन यजतामृत्विजा
यज्ञकर्म स्वयं कृतवतामपि इदमश्वमेधादिकं यज्ञकर्म नास्माकं किंचिदपि तु दीक्षितस्य पुण्यवतः वय
किलेह यज्ञकर्मणि नियमितमूल्यमात्रार्थिनो न केचन मन्ये वयं यजमानः पुनरस्य नाककर्मणः स्वर्गादिफल
भागपीति तेषां कर्मफलाभिमानाभावान्न स्वयं कृतमपि कर्म तदीयेन स्वर्गादिना फलेन युज्यते यजमान

न ना०

कि०

ॐ ३२

स्तु तत्र यत्तु कर्म स्वयमकुर्वाणा ऋत्विग्निर्वर्त्यं कर्म ऋत्विक्प्रेरणा अपि ममेदमस्त्वमेधादिकं यत्तु कर्म मदीय
नधनेनामी ऋत्विजः कर्मणि प्रवृत्ता इति ममैव स्वर्गादिफलं देहपातादवश्यं भावीत्यकुर्वाणस्यापि यथा १
समीहितकर्मफलाभिमानदार्ढ्यात्तस्य कर्मफलेन युज्यते अत एव कर्त्रभिप्राये क्रियाफले इति दीक्षिता
त्कार्त्विर्यजते यजमान इत्यात्मनेपदं कर्त्रनभिप्राये त्वपरस्मैपदं यजंति याजका इति इयतीयान्महिमा
दुर्लंघ्यो विकल्पस्यातं अस्य यत्स्वयं कृतमपि कर्म फलाभिमानाभावान्न फलेन स युज्यते अन्यैः कृतम
पि कर्म ममेदमित्यभिमानदार्ढ्यात्फलयुक्तं स्यात् तस्माद्धृविद्याया स्वक्रियमाणयोगिना कर्मफला
भिमानाभावान्न तत्फलं भवेदिति ९७ एवं सर्वकर्मसु हेयोपादेयकल्पनाकलंकपरित्यक्तबुद्धिर्ज्ञानीदी
प्तः स्यादित्याह । इत्थं सकलविकल्पान्प्रतिबुद्धो भावनासमीरणात्: आत्मज्योतिषि दीप्तेऽस्मिन् ब्रह्मज्योति
र्मयो भवति ९८ । इत्थं व्याख्यातेन हृद्येणया भावनया अहमेव चैतन्यमहेश्वरः सर्वात्मना सर्वदा स्फुरा
मीति या आत्मनि विमर्शवृत्तिः सैव शनैः प्रसरन्ती समीरणो वायुरिव तेन ज्ञानी प्रतिबुद्धो भस्मच्छन्नो वा
गुरुना प्रतिबोधितो वह्निर्यथा सकलविकल्पान्प्युरस्मि कर्मबंधबद्धो देहत्वपी ममेदं पुत्रदारादि अमु
नाकर्मणा स्वर्गो नरको वा भविष्यतीत्यादि सर्वाः कलनाः अहमेवेदं सर्वमिति परामर्शाग्निसंधुक्षितान्ना

रमा

प॰ र॰ वि ३३

त्मज्योतिषि चैतन्यकृशानौ दीप्ते पराहंताचमत्कारैकस्रुव अविकल्पसंविद्रूपाज्यप्रक्षेपेण समर्पयन्
स ज्योतिर्मयो भवति दाह्यविकल्पेंधनपरिक्षयाद्धूहूकाकारश्चिदग्निरेव संपद्यते परप्रमात्रेकवपुर्
भावविष्यत इतियावत् ९८ एवं व्याख्यातेन प्रकारेण यः प्रकृष्टज्ञानयोगाभ्यासरतः संप्रोषवर्तनया
कथं कालमतिवाहयतीत्याह ॥ अप्स्वन्यथा तथा संवीतो येन केन चिद्भ्रांतः यत्र क्वचन निवासी विमु
च्यते सर्वभूतात्मा ९९ यः कश्चित्पुनः प्रतिसदनयोगपदार्थमस्पन्दे चमत्कुर्वन् न पुनर्नियमेन इ
दं पवित्रमिदमपवित्रं इदं कदन्नमिदं मिष्टान्नं इति हेयोपादेयकल्पनाविरहाद् यत्तेनापतितं यदपि त
दपि समाहरन् तथा संवीतो येनेत्यादि कंथया चर्मणा वल्केन वा तूलपटादिना दिव्याम्बरैर्वा समा
च्छादित इत्युभयथोत्कर्षणाभावाच्छरीराच्छादनार्थक्रियार्थीभूतत्वान्नापि किंचिद्धेषि नापि स्नेतीति
कथमेतत् यतः सप्रांतः सुखदुःखादिविकल्पनातिक्रांत इति तथा यत्र क्वचन निवासीति यत्र क्व
चनयाहृयोतागृहे [illegible] स्थाने सपरिग्रयमानार्थीन्न पुनस्तत्स्थदेवायतनतीर्थादिषु पवित्रत्वात्सीका
र्यो भवति नापि श्मशानश्वपचसदनाद्यपवित्रत्वात् परिहार्यस्थानात् अयत्नेन यद्यत्स्थानमापतितं त
दधिवसति पवित्रकल्पनाकलंकविरहात् विमुच्यते इति एवमपि संप्रोषवर्तनया परानुग्रहार्थं प्रवृ

समाप्त 33 पकर्ष रमा ॐ ३३ पवित्रा

य

तः कालमतिवाह्य निष्कृच्यते परमशिवो भवति उक्तं च येन केनचिदाच्छन्नो येन केनचिदाशितः यत्र क्व
चन शायी च स तं देवा ब्राह्मणं विदुरिति मोक्षधर्मेष्वपि अनियतफलभक्ष्यभोज्यपेयं विधिपरिणामवि
भक्तदेशकाले हृदयस्थमेवमसेवितं कदर्येभ्रतमिदमाजगाम शुचिश्चरामीति कथमेवमपि कुर्वन् ८
ज्ञानी स्वयं मुच्यते इत्याह सर्वभूतात्मेति यतः स ज्ञानी सर्वभूतात्मा सर्वेषां भूतानां आत्मा सर्वाणि च भू
तानि तस्यात्मेति ज्ञात्वा न किंचिद्धेयकर्तव्यता भवति सर्वविमुक्तो येऽस्य संपद्यते इति ९ नाप्येवंभूतस्य नि
रभिमानस्य यत्किंचित्कुर्वतोऽपि पुण्यपापस्पर्शसंभव इत्याह ९ हयमेधशतसहस्राण्यपि कुर्वतो ब्र
ह्मघातलक्षाणि परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः १० य एवं परमार्थवित्स्वात्ममहेश्वरस्व
भावसतत्त्वज्ञः सोऽश्वमेधराजसूयात्सर्वयामादियज्ञान्निःसंख्यान्फलकामनाभिमानविरहात्कर्तव्यतामा
त्रमिदमित्येवं कृत्वा क्रीडार्थं यदि कदाचिद्विहितानि कर्माणि विदधाति अथवा द्विजहननसुरापान
स्तेन्यादिप्रमादोपनतानि महापातकान्यविहितान्यपि प्रमादीरतयाचेत् शुभयथा अहंममेत्यभिमानाभा
वात्परमेश्वरैकवेत्थविजृंभते मम किमायातमिति बुद्ध्या न पुण्यैः शुभफलैर्नापि पापैरशुभैः संघाती अज्ञानी
स्पृश्यते मलिनीक्रियते इति कथमेतदित्याह विमल इति यतस्तस्य विगताः प्रक्षीणा आणवमायी

यत्कार्ममलाः संसरणहेतव इति एवंमलिनस्य हि प्रमातुर्विछिन्ने देहादिप्रमातृत्वतयाज्ञारगव आत्मात्मीया
भिमानभावः येन ममेदं कर्म शुभमिदमशुभमित्यभिमानं द्रोतान्मात् पुण्यपापसंबन्धयोगः स्यात् यस्य कर्म
फलसंचये ममत्वहेतुर्मलप्रचयो विगतः तस्याभिमानाभावात् कथं पुण्यपापस्पर्शः यथा भगवद्गीतासु ।
यस्य नाहंकृतो भावो यस्य बुद्धिर्न लिप्यते हत्वापि स इमांल्लोकान्न हन्ति न निबध्यते इति ७० एवंविधस्य
ज्ञानिनो नियतचर्यामुपदेशन्नाह । मदहर्षकोपमन्मथविषादभयलोभमोहपरिवर्जी निःस्तोत्रवष
ट्कारो जड इव विचरेदवादमतिः ७१ मदो देहप्रमातृत्वाभिमानः हर्षोऽभिलषितस्य लाभात्प्रमोदः कोपः क्रो
धः मन्मथः संभोगाभिलाषः विषादः इष्टवियोगान्मूर्छात्वं भयं शत्रोः सिंहव्याघ्रादेर्वा दरः लोभः कार्पण्यं ।
मोहः भूतेष्वात्मीयभाव इत्येतान् देहसंस्कारप्रत्यवमर्शान्निषेधमध्ये समायातानपि सर्वं ब्रह्मास्मीति परि
वर्जयति अविकल्पकसंविद्रूपानुप्रवेशेन स्वात्मप्रत्यवमर्शशेषीभूतान्संपादयति तथा निर्गतः स्तो
त्रवषट्कारेभ्यः यः स एवं स्तुत्यस्य व्यतिरिक्तस्याभावान्न तस्य स्तोत्राद्युपयोगः नापि विष्णुरुद्रादिमंत्रमंत्र
यो भिन्नस्य देवताविशेषस्य विरहात् केवलं स जड इव विचरेदवादमतिरिति पूर्णत्वादाकांक्षाविरहात्
न्मत्त इव इति कर्तव्यतारूपेषास्त्रीये कर्मणि प्रमाणोपपन्ने वा प्रमेयस तत्त्वे प्रमात्र्यभिसंदेहे उपपन्नमि

द्वैतेतिविचारबहिष्कृतबुद्धिर्नापिस्वात्मन्युपदेशमपेक्षते गुरावनुपदेष्टृत्वात्प्रमेयमन्यत्पश्यतीतिद्वैत
प्रायोक्षत्वात्सर्वंब्रह्मावलोकयन् क्रीडार्थंविहरेद्देवेतिजडत्वेननिरूपितः २१ एवमपिपरिवर्ज्यमा
नेनापिमदादिवर्गेणवयमिवज्ञानीसतिशरीरेकिमिवनस्पृश्यतेइत्यत्रकारणमाह ॥ मदहर्षप्रभृ
तिरयंवर्गःप्रभवतिविभेदसंमोहात् अद्वैतात्मविबोधस्तेनकथंस्पृश्यतेनाम २२ समस्तनरकादि
काख्यातोमदादिवर्गःसविभेदसंमोहादितिआत्मात्मीयरूपोयोविभेदसंमोहःअप्रख्याविख्यातिः
ततःप्रभवति यस्तुप्रमातृभ्योद्वैतभ्रान्त्याहेयोपादेयतयासक्तात्पद्यते यःपुनःसर्वंब्रह्मास्मीतिपरमा
द्वयात्मबोधःसहष्टज्ञानीआकाशकल्पःसतेनमदादिवर्गेणकथंनामस्पृश्यतां केनप्रकारेणाभि
लीक्रियतां भिन्नंवस्तुभिन्नस्यहिकदाचित्स्वरूपमर्पयतांब्रह्मात्मभूतत्वेनदृष्टेहितोमदादिवर्गोब्रह्मभू
तस्यज्ञानिनःसमानजातेःकथंविरोधायस्यादिति २३ बाह्यस्तवनहवनवर्गोपिद्वैतसमाश्रयएव
मतस्यपरितोषायालमित्याह ॥ स्तुत्यंवाहोतव्यंवास्तिव्यतिरिक्तमस्यकिंचनच स्तोत्रादिनासद्वै
वैकमतस्तत्रिर्नमस्कृतिवषट्का २४ ॥ स्तुत्यंकिंचिद्देवतारूपंहोतव्यंवाकिंचिज्ज्ञानिनोऽद्वयबो
धरूपस्यनव्यतिरिक्तंविद्यतेयत्स्तूयतेहूयतेवेति नापिकर्तव्यमित्येवंरूपतयाचस्तोत्रादिनासह्या

शि॰
६

ततः परितोषं याति अभेदबोधः संबोधेन हि नित्यानंदमयत्वात् कृत्रिममानंदं नाश्रियते तस्मान्निर्ग
तो नमस्कृतिविषद्भ्यः यः स एवं ज्ञो वेदांतेष्वेवं तत्त्वतः ७३ न च तस्याभिन्नेन देवगृहेणोपयोगः स्वशरी
रमेवात्मदेवताधिष्ठानं संविदाश्रयो वा नान्यः कश्चिदिति तन्नो भिन्नं देवगृहमस्येत्याह षट्त्रिंशत्तत्त्वभूतं
विग्रहरचनागवाक्षपरिपूर्णं निजमन्यदथ शरीरं घटादि वा तस्य देवगृहं ७४ तस्य ज्ञानिनः निजः
परकीयो वा देह एव देवतावेश्म स्वात्मदेवताया भोग्याधारत्वात् बाह्यस्तत्त्वमेवादिः प्रसादस्तदा
देवगृहीभवति यदा गुरुकरणशरीरव्याप्त्या षट्त्रिंशत्तत्त्वकलनरूपया परिकल्पितः स्यात् तद्गतो बाह्यो
पि देवः स्वात्मव्याप्त्या चिह्नत्वेन परिगृहीतश्चेत्तदा सोपि तत्र देवे भवेत् अन्यथा भयमेतज्जडं शिला
शकलकल्पमेव कथं भक्तानुद्धरेत् मृत्ताम्रमय्यादि वा न येत् इत्येवमस्य यावत्तावच्छरीरं संविदा
श्रयत्वाद्देवगृहं तद्गतः सर्वेषामपि स्वात्मा देवः इति देह एव संप्रबुद्धस्य देवगृहं कीदृशं तदित्याह ष
ट्त्रिंशत्तत्त्वेति बाह्यं षट्त्रिंशत्तत्त्वव्याप्त्या परिकल्प्यते यद्देवगृहं पुनः साक्षात् षट्त्रिंशत्तत्त्वैः भूतं यो
षितं बाह्यदेवगृहे वा गवाक्षरचना भवति इदं तु विग्रहरचनागवाक्षपरिपूर्णमिति विग्रहे रचनादिद्
यद्द्वारपरिपाटिः सैव तमो विकल्पनात् तया परिपूर्णमग्रद्वारमिति बाह्यदेवगृहसदृशं न केवलं शरी

प. सा वि वृ ४५

35

मत्याशालादि मयः =
देवगृहं =

इदं तु
शरीरे

रेसंविदाश्रय इति कृत्वा देवगृहं यावद्यत्किञ्चिद्धासं विदधिष्ठितं तत्सर्वं तस्य देवगृहमित्याह घट
दिवेति घटाद्युपलक्षितं विषयपञ्चकमिदं भोग्यरूपं चक्षुरादिद्वारेण संविदाश्रितमिति भोक्तैव भो
ग्यभावेन सदा सर्वत्र संस्थित इति स्पन्दशास्त्रोपदेशाद्दृश्यं संविन्मयमेव ज्ञानिनो भूतशरीरवद्घटादि
विश्वभावशरीरमिति कृत्वा तदपि अभिन्नरूपतया शरीरवद्देवक्रीडावतः स्वतन्त्रस्य स्वात्ममहेश्वरस्य गृ
हं भोग्याधिष्ठानमिति १४ बाह्यदेवगृहे किल भक्ताः पुष्पाद्याहरणपूर्वं देवस्य पूजापरोऽहः देहदेवगृ
हे तु ज्ञानी किं कुर्वन्नधितिष्ठतीत्याह तत्र च परमात्ममहाभैरवशिवदेवतां स्वशक्तियुतां आत्मामर्शन
विमलद्रव्यैः परिपूजयन्नास्ते १५ तस्मिन्स्वदेहदेवगृहे प्रकृष्टयोगी परमः सर्वातिशायी यच्चैतन्यल
क्षण आत्मा स एव निःशेषबाह्यादिविषयभोगविलापनप्रगल्भत्वाद्भैरवस्तेन वक्ष्यमाणेन क्रमेण तां
तर्पयन्परिस्फुरेत् ननु बाह्यदेवतापरिवारयुता भवति स्वाः चैतन्यरश्मिरूपाः चिन्निर्वृतीच्छाज्ञान
क्रियाशक्तीनां विभवात्मिकाः चक्षुरादिकरणशक्तयस्ताभिर्युतां समस्तादाहृता द्रव्यैः परिपूजयन्ना
स्ते इत्याह आत्मामर्शेत्यादि स्वात्मैवेदं सर्वमिति यत् आमर्शनं सर्वपदार्थानां संविद्रूपतया स्फुरणं
हंता विश्रान्तिलक्षणोऽयः परामर्शस्तेन न द्वैतकालुष्यकलंकतया हि विमलानि यानि शब्दादिविषयप
ञ्चरूपद्रव्यमनस्वभावः स एव शिवदेवता प्रकृष्टयोगीरूपदेवस्तां परिपूजयन्नास्ते ५

तेन

पतां किं परि
वारयुतां सम
र्थयति स्वतन्त्र
रूपशक्तियु
तामिति ४

स्म

महाभैरवशि
वदेवतां ५

स्वात्मदेवतापूजनम् अतएवशब्दादयो विषयाः पूजोप[illegible]

प॰ शा॰ वि॰ ३६

सकलरूपाणि पूजार्थं द्रव्याणि यत्नापगमेन विकल्पज्ञानिनैरात्मामर्शनविमलद्रव्यैरिति अयमाशयः ज्ञानी हि
यो ग्राह्योपादेयभेदकलंकपरित्यागेन अयत्नोपनतशब्दादिविषयपंचकं श्रोत्रादिकरणदेवीभिः समाहृत्य
अंतस्थमत्कुर्वन् स्वात्मनाभेदमास्वादयतीत्येवमनवरतं प्रतिविषयस्वीकारकाले येनतदभेदेन चमत्
कारः स्फुरणाहंतास्फुरणं एतदेव कारणमित्यवधानं तु विषयग्रहणकाले प्रतिक्षणं स्वात्मदेवतापूजकेन
भाव्यमिति रहस्यविदः एतदेव स्तुतिद्वारेण राजानकरामो ऽप्युक्तवान् यथा नित्योद्दामसमृद्धमाहृतज

भैरवंरूपं

गद्भावो महार्घार्पणवाग्भिस्तवतेजसी प्रभृतिभिर्यद्भक्तिभिस्तर्प्यते तन्मांसासवमांस्थिकटकलिलेका

इत्यादिशक्तिभिः

येष्मशानालये यद्रूपे दर्शयै भैरवं भवनिशासंचारवीरस्य मे इति ७५ पूजां तेतावदभिहवनेन भाव्यमि
तिज्ञानिनः कथं तदित्याह बहिरंतरपरिकल्पनभेदमहाबीजनिचयमर्पयतः तस्यातिदीप्तसंविज्ज्वल
नेयत्नाद्विनाभवति होमः ७६ ॥ तस्यैवंविधस्य स्वात्मदेवतापूजकस्यातिदीप्तपरहंताचमत्कारस्मा
रो चैतन्याग्नौ यत्नाद्विना तिलाज्येंधनादिस्वीकारकदर्थनया ऽगृहीतहोमैव ह्यक्तितर्पणं संपद्यते किंकुर्वतः
इत्याह बहिरंतरेत्यादि बहिर्नीलादौ प्रमेये यो ऽयमपरप्रमात्रादिकल्पनमंतर्वा यो देहप्राणादौ च यत्संकल्पन
मित्येवंरूपो यो भेदः बाह्यग्राह्ययोः प्रमेययोर्निश्चयसंकल्पनाभिमानवृत्तिस्वभावना नानात्वमेतदेव महा

ऽ अतेर्

३६

भ्रमर॰ प्रमातृ॰

बीजं प्रमातृप्रमेययोस्तत: समस्तपरिकल्पनारूपस्य भेदबीजभूतस्य निचय: भेदस्यानंत्याद्राशिस्त
सर्वं यत: परमाद्वयरूपाविकल्पकसंविद्रूपानुप्रवेशेन स्वात्मवह्नौ ज्ज्हुतमिति अयमाशय: परब्रह्मात्म
कस्य योगिनो देहादिप्रमातृताभिमानाभावाद्य: स्वस्वसिद्ध: स्वपरप्रमातृप्रमेयकलनापरित्याग: स ए
वास्तविको होम: यथाह श्रीभट्टवीरवामन: यत्रेंधनं द्वैतवनं समस्तमेव महाग्ने: अलौकिकेन यज्ञेन ते
न नित्यं यजामहे इति ॥ १६ ॥ एवंरूपस्य याजकस्य ध्यानमाह ॥ ध्यानं मनस्तमितं पुनरेष हि भगवान्
विचित्ररूपाणि सृजत्तदेव ध्यानं संकल्पलिखितं सत्यरूपतं ॥ १७ ॥ नियताकारचिंतितस्याकारस्या
न्यत्र मनोवृत्तेर्गमनात् यो स्थितिरिदं पुनरनस्तमितं ध्यानं यस्मादेष भगवानप्यनंत: स्वात्मरूपो महेश्वर:
क्रियाशक्तिस्वभावविकल्प: स्वातंत्र्येण यानि विचित्राणि रूपाणि सृजति अनवरतं नानापदार्थान्वि
कल्परूपानाकारान्बुद्धिदर्पणे समुल्लिखति तदेवास्तोदयवर्जितमेतस्य ध्यानं चिंतनेनातोन्यत्किंचित्
इतरत्र तद्देवताविशेषेणानावर्णागयपरिकल्पनयानेयत्वस्मात् सर्वो मनोव्यापार: परशक्तिस्फारस्य
ल्लवभूत इति जानानस्यानवच्छिन्नमिदं सर्वं परमेश्वरीभूतं तथा संकल्पेन मनसा समालिखितं सविद्धि
नौ चित्रीकृतं सत्यरूपत्वं परमार्थताय स्य ध्यानस्य तदेवं यत: सर्वमिदं प्रकाशमानं विकल्पोल्लिखितं

सिदं ८

ध्यं ^

तत्र तत्र परानन्दस्वरूपं
प्रकाशात = पाशात्रयम् सर्व॰ छन्दशास्त्रे

मनोव्यापाररूपमपि प्रकाशानतिरिक्तं सर्वत्र संविदनुगमनादिति तदुक्तं श्रीमत्स्वतंत्रसारे यत्र यत्र म
नो याति मनस्तत्रैव धारयेत् चलित्वा क्व गमिष्यति सर्वं शिवमयं यत इति तथा शैवोपनिषदि यत्र यत्र
मनो याति बाह्ये वाभ्यंतरे प्रिये तत्र तत्र शिवावस्था व्यापकत्वात्क्व यास्यति तस्मात्स्वरसोदितमेतद्यो
गिनो ध्यानमिति ॥ ११ ॥ जपश्चास्य कीदृशः स्यादित्याह १ भुवनावलीं समस्तां तत्त्वक्रमकल्पनां त
थाध्वगणं अंतर्बहिः परिवर्तयति यत्सोस्य जप उदितः ॥ १८ ॥ वक्ष्यमाणेन क्रमेण यो विश्वस्य प्रतिक्षणम
भेदेन पराहंताप्रत्यवमर्शः सोयमस्य जप उदितः अकृत्रिमत्वेन कथितः कोसावित्याह भुवनावलीं स
मस्तां षट्त्रिंशत्तत्त्वसमूहवर्तिनीं चतुर्विंशत्युत्तरशतद्वयसंख्यातां प्राकारपंक्तिं निःशेषां तथा तत्त्वक्रम
कल्पनामिति तत्त्वक्रमस्यात्मविद्याशिवाख्यस्य परिकल्पनां परिच्छेदं अथाध्वगणमिति अंतर्बहि
ष्करणरूपमिंद्रियसमूहं चेति अंतर्बहि मध्यमप्राणशक्त्यात्मसूत्रभूतायां स्वसंवित्तौ नादबिंदुप्रवाह
क्रमेण यः परिवर्तयति अरघट्टघटीयंत्रवत्प्रतिक्षणं विक्षेपं सृष्टिस्थितिसंहारक्रमेण सर्वमेतत्स्व
संवित्तौ परिभ्रमंति प्रतिक्षणं नादात्मना परामृशतीति यावत् स एव पूर्णाहंताविश्रांतिलक्षणः अ
कृत्रिमोस्य जपः अयमाशयः जपः किल वाच्यरूपायां देवतायां वाचकस्य मंत्रस्योच्चारः स च अत्र माल

प॰ ऋ॰ तत्र ३७ वर्ग नी॰ २॰ य॰

मप्रा ७८

याप्राणशक्तिर्व्यापिकयात्तविपरिवर्तनक्रमेण संलक्ष्येयः परमार्थयोगिनः स्फुरत्प्राणशक्तिरूपतत्त्वभूता
मर्थ्यवाहक्रमेण नदन्ती स्वरसोदिता सर्वाक्षरकोडीकारेण महामन्त्रैवात्मा लोच्यते यतः सर्वमिदं वाच्या
षट्त्रिंशत्तत्त्वात्मकं विश्वं प्राणशक्तावेव प्रतिष्ठितं सा प्रतिप्राणविहितेयं तदयक्रमेण पुरा स्वभावा भग
वती प्राणरूपमाश्रित्य विमृशन्ती प्रतिप्राणस्पंदमवधानवतो योगिनो जपमहाज्ञिमं साधयति अत्र
जपसंख्येति एकविंशतिसहस्राणि षट्शतानि दिवानिशं जपेद्दिव्याः संवृद्धिः सुलभो दुर्लभो ज
डैरिति श्रीवायनिषद्भिः शिवसूत्रेषु कथाजपादिति एवमेवं सेवचरणं नामवधानवतामेव गोचरइति" घ
इदं वृत्तमस्येत्याह सर्वं समया दृष्ट्या यत्पश्यति यस्संविदं मन्यते विश्वमस्मान निरंशो विग्रहः स्वद्धा
गकल्पनाकलितां ७१ विश्वरसासवपूर्णं निजकरगेद्यखंडकपालं रसयति यस्तदेतदुत्तमस्पंड
र्लभं च सुलभं च ७ ॥ एवं यद्दुत्तमा गामेत देवास्य ज्ञानिनो व्रतं स्वात्मदेवतासमाराधनाय नियमः
कीदृशं तदाह सुदुर्लभं च सुलभं चेति सुदृक्कृतागाद्दुःखेन प्रख्यातिपरिहत्या दन्योपायपरिहारद
येण परमेश्वरानुग्रहेण लभ्यत इत्यतः सुदुर्लभं तथा सुखेन बाह्यास्थिभस्माद्याहरणाहारनियमादि
स्वीकारकदर्थनां विना च लभ्यत इत्यतः सुलभं किं तद्व्रतमित्याह सर्वमित्यादि यत्सर्वमिदं प्रातीतिकं

भेदावभासरूपं युक्त्यागमानुभवपरिशीलनेनाभेदहृष्ट्या सर्वमिदमेकः स्फुरामीति समीक्षते यथा भ
गवद्गीतासु सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः इत्यादि
एवमभेदबुद्धिदार्ढ्यमेव व्रतं अन्यच्च यद्विश्वश्मशाननिरतां संविदं मनुते तदपि व्रतं यथा विश्वं ग्राह्य
ग्राहकस्वभावं घटदेहादिजडलक्षणपदार्थभावशात् समाक्रान्तमिति कृत्वा तदेव श्मशानं पितृवनं अतः
संविदेवैका भगवती अजडा अप्रतीतोन्मत्तडुल्लासितं सर्वमिदं भावस्थानीयं जडं अतो विश्वरूपश्मशानेन संह
तास्मिन् विश्वश्मशाने निःशेषेण रतां संविदं समस्तोत्पत्तिनिधनतया महाभीषणे मध्यवर्तिनीं मनुते अव
बुद्ध्यते व्रती किल श्मशाने वसति अयं पुनरलौकिको व्रती सर्वदाहमेव एकश्चिन्मात्रपरमार्थ इति मा
त्राजडैः पशुप्रमातृभिर्दृष्टादिभिः प्रमेयैश्च परेतस्थानीयैः सहोन्मत्तवत्क्रीडां कुर्वाणः संसारभुवमिमां
सर्वप्रमातृप्रमेयनिधनतया भीषणां श्मशानस्वभावामध्यास्ते अन्यच्च यद्विग्रहखट्वाङ्गकल्पनाकलि
तां संविदं मनुते इति विग्रहः स्वशरीरं स एव खट्वाङ्गकल्पनाकः कालविधिः योगिनः किल स्वशरीरप्रमात
त्रभिमानमुद्गृह्य संत्यज्य शारीरातीतस्वात्मानं मन्यमानस्य संस्कारशेषीभूतो विग्रहः शवप्राय एवेत्यवधा
रयतः स्वशरीरमेवैककालमुद्राकल्पनात्तया कलितां भोग्याधारत्वेन कौद्रितां वीरव्रतिनो हि श्मशान

तेन
व

उँ
७८

स्यस्य खट्वांगमुद्रयाभाव्यमानोऽस्य संविद्वपुषः स्वशरीरमपि विद्यतयाभिन्नमिव धारयतः सैव खट्वा
ङ्गमुद्रेत्येतदप्यस्य व्रतं तथाविद्यखंडककपालेरसयति चर्वयति यच्च शब्दादिविषयपंचककल
नेनं सर्वभोगपरूपमिदं वेद्यं ज्ञेयत्वकार्यत्वाभ्यां परिच्छिन्नमिति खण्डकं कर्परप्रायं तदेव कपालमि
तोस्थिशकलं यद्ग्रसयति साराहरणक्रमेण पूर्णाहंता विश्रान्त्या चमत्कुरुते इत्येतद्व्रतमपि व्रतिना
किल कपालस्य वीरपानं रसपानं इत्याह विश्वरसेति विश्वस्मिन्वेद्य शब्दादिविषयपंचकरूपे कपा
लखंडे योऽसौ सारभागः चर्वणामृतमयो भ्राः स एव परमानंददायित्वाद्रसासवः उक्तमपानं तेन पू
र्णनिर्भरं एतत्कं स्यात् विश्वस्य यः पालकस्थानीयः कठिनो भ्राः पत्रकल्पः स एव कपालं तद्गतः सा
रभागश्चमत्काररूपसः आह्लाददायित्वात्पानमिति कपालं व्रतिनः करगतं भवतीत्याह निजकर
गतमिति निजाः स्वात्मीयाः ये कराः चक्षुरादिकरणदेवीस्वभावा रश्मिमरीचयः तेषु भोग्यतया तद्वे
द्यखण्डके विषयत्वं गच्छतीति निजकरगं यथा पाणिस्थेन कपालेन पानं पीयते तथैव वेद्यखंडक
कपालेन विश्वरसासवं चक्षुरादिसंवित्करैः योगिनां समाहृत्य प्रास्वाद्यते प्रथमाशयः योगी सर्व
देव यथोपनतं विषयपंचककारणदेवीभिराहृत्य युक्त्या स्वचैतन्यभैरवविश्रान्तिमविच्छिन्नां भजमा

प॰
सा॰
वृ॰
७९

मश्चरमक्षणपर्यंतं यथोपदिष्टमद्वयदृशा निर्वाहयतीत्येतदेवास्य परिशीलितसद्गुरुचरणपंकजस्या-
व्रतमतोन्यच्छरीरस्थोपि क्षणमात्रमिति ८ प्राक्प्रतिपादितं संकल्पयन्नस्योपदेशस्योत्कृष्टत्वमाह इ
तिजन्मनाशाहीनं परमार्थमहेश्वराख्यमुपलभ्य उपलब्धताप्रकाशात्कृतकृत्यस्तिष्ठति यथेष्टं प
इति समनंतरोक्तेन प्रकारेण यत्प्रतिपादितं रहस्यं परमार्थमहेश्वराख्यं तात्त्विकं महेश्वरमुपलभ्य
स्वात्मनि दृढप्रतिपत्त्या समभ्यागत्य भूयो कीदृगाह जन्मनाशाहीनं सिद्धियेनाधिगतेन जन्मनि मरणे
न स्यातामिति यावत् कृतकृत्यस्तिष्ठति यथेष्टमिति एतत्प्राप्य कर्तव्यतांतरस्याभावान्निष्पन्नपरपुरु
षार्थः यथेष्टं स्वेच्छातिक्रमं विना स्वातंत्र्येण चक्रभ्रमवद्भूतशरीरस्तिष्ठति वाहयन्नास्ते कथमाह उ
पलब्धताप्रकाशादिति एतद्रहस्यपरिशीलनेन सर्वाह्लादप्राह्लस्वानुभवितृतया प्रकाशः परिस्फु
रणं तस्मादिति शरीरस्थोपि पूर्णानंदमयः इति यावत् कृतकृत्यस्तिष्ठति यथेष्टमिति योगी एतत्प्राप्य
कर्तव्यतांतरस्याभावान्निष्पन्नपरपुरुषार्थः यथेष्टं स्वेच्छातिक्रमं विना स्वातंत्र्येण चक्रभ्रमवद्भूतशारी
रस्थितिकालमतिवाहयन्नास्ते कथमाह उपलब्धताप्रकाशादिति एतद्रहस्यपरिशीलनेन सर्वाह्ल
दप्राह्लस्वानुभवितृतया प्रकाशः परिस्फुरणं तस्मादिति शारीरस्थोपि पूर्णानंदमयइति यावत् प

योगी^
कालमति^

३
वृ॰

इत्थं स्वात्मानं कश्चिज्जीवत्तामध्यासीनो जानानः स सर्वस्तद्रूपः स्यादिति । अधिकारिनियमाभावमाह व्या-
पिनमभिहितमित्थं सर्वात्मानं विधूतनानात्वं । निरुपमपरमानन्दं यो वेत्ति स तन्मयो भवति ॥ ८२ ॥ इत्थ-
मित्युक्तेन प्रकारेण व्यापिनमनवच्छिन्नचिदानन्दैकघनं शिवमभिहितं पूर्वं यागमानुभवपरिशीलन-
क्रमेणावेदितं यो वेत्ति यः कश्चिदेव प्राणिमात्रो जानाति स सर्वस्य संकोचस्तन्मयः शिव एव स्या-
दित्यत्र स्वात्मज्ञानेनाधिकारिनियमः । येयतो केचन जन्ममरणादिदोषाच्छन्नाः तिर्यञ्चोपि वा ते सर्वे
स्वात्ममहेश्वरप्रत्यभिज्ञानात्तन्मया भवन्तीति यत्तद्रूपस्य परमार्थः । कीदृशं च स्वात्मानमिति सर्वेषां प्रमा-
तृप्रमेयाणामात्मा सर्वाणि वा प्रमातृप्रमेयाणि यस्यात्मा सर्वोत्तीर्णं सर्वमयमिति यावत् अत एवा-
विधूतं न्यक्कृतं सर्वदा सर्वत्र चिद्रूपतया स्फुरणान्नानात्वं भेदानन्त्यं येन तं । एवमाकाङ्क्षाविरहान्निरुपमा-
मं विशेषणरहितः प्रकृष्टानन्दो यस्य तमेवंविधमिति स्वात्मानं जानानः सर्वः शिवरूपी स्यादिति ॥ ८२ ॥
एवमधिगतात्ममहेश्वरः स शरीराधिकारपरित्यये अत्र शरीरं परित्यजेत् किं वा यातीत्याद्याशङ्कां
परिहरति तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन्देहं । ज्ञानसमकालमुक्तः कैवल्यं याति हतशो-
कः ॥ ८३ ॥ एवं परिशीलितस्वस्वरूपो ज्ञानी सर्वमिदं स्वात्मप्रकाशस्वातन्त्र्यमिति परमाद्वयदृशा गाढ

पि०

प॰ मा ५॰

समाश्वस्तहृदयः तीर्थे प्रयागपुष्करकुरुक्षेत्रादौ महापुण्ये स्थाने अथवा श्वपचसदने अन्यजनगृहे
पतत्विति अतिपापीयसि शरीरं वदन्ति तुभयथा स्वीकारपरित्यागकदर्थनाविरहितोपि आत्मज्ञा
नादेव कैवल्यं याति कलेवरपरित्यागात्प्रधानादिकार्यकारणवर्गेभ्यः अन्यस्मिन् चिदानंदैकघनो
त्तर्यतीतत्रूपां केवलतां यातीति भावः यतोस्य सर्वमिदं विश्वं स्वात्मना पूर्णं समं ब्रह्मरूपमेव स्वराधि
ष्ठितं पश्यतः नेदं शुद्धमिदं शुद्धमिति विभागः अतएव हतः परकृतो विकल्पशंकासमुदायः शोको येन स एव यथो
क्तं हिमवति गंगाद्वारे वाराणस्यां कुरौ प्रयागे वा वेश्मनि चंडालादेः शिवतत्त्वविदां मरणमिति
श्रीनिर्वाणयोगोत्तरे नान्यस्य देहपातावसरे स्मृत्युपयोगः इत्याह न हि स्मृतिरपीति आत्मानुस्मृ
तिरित्यपिशब्दार्थः यदि वा सज्ज्ञानी शरीरत्यागकाले जड्यवातपित्तश्लेष्माभिभवान्नष्टस्मृतिः काष्ठ
पाषाणतुल्यत्वाद्विगतस्वात्मसंबोधः कलेवरमवशो भूत्वा त्यजति तथापि प्रागधिगतस्वात्मज्ञानः
कैवल्यमवश्यं याति ततो न स्वात्मज्ञानाधिगमेन प्रमेयसमये स्मरणास्मरणे विशेषोस्तीति ननु तीर्था
तीर्थप्रविभागो मास्त्वात्मज्ञानविदो माभूत् यत्तु नरं तकाले स्मृतिरपीति यदेव स्वात्मज्ञानमु
पायतया गृहीतं तस्य देहपातावसरे विस्मरणं चेत्तर्हि कथं स मुक्तः स्यात् यदुक्तं अंतकालेऽपि

५०

ॐ ५०

मामेव स्मरन्मुक्त्वा कलेवरं यः प्रयाति त्यजन्देहं स याति परमां गतिमिति गीतासु एवमप्यत्र स्मरणस्यैवो-
पयोगः यद्यपि परमेश्वरस्मरणाभावेप्यंतकाले तत्काले तज्ज्ञावाप्तिः स्यात् तर्हि सर्वः पशुजनः समयस्म-
ये मुक्तो विशेषात्परमेश्वरसमापत्तिं यायात् वाक्यानि चैवमादीन्यप्रमाणानि स्युः नैवमित्यत्रोत्तरमा-
ह ज्ञानस्य कालस्तु कस्य इति नास्य स्मरणेनोपयोगः किंतु सद्गुरुणा यदैव तस्य कर्णमूले स्वात्मसंदेशवज्ज्ञानो-
पदेशः कृतः तस्मिन्नेव कालेऽहमेव सर्वमिदमित्यधिरूढज्ञानपरमार्थो विगलितमायादिकंचुकभावो
नान्यत्किंचिदपेक्षते केवलं संस्कारशेषतया च प्रारब्धमवशिष्टं वहमान इति तदनन्तरं पुनरंतकाले स्म-
रणास्मरणकादर्थनाय स्मादज्ञानजनितमायीयकंचुकसंबंधे सति देहकंचुकं प्रभवति स्वात्मज्ञानो-
पदेशेन अज्ञानजनितकंचुकत्वयात्कार्यं देहकंचुकं विनष्टप्रायं पर्यंते तानि लोपं व्रजंति कार्यमलमि-
ति स्वात्मज्ञानकथनावसरे एव सजीवन्नेव मुक्तः स्यात् यथोक्तं कुलरत्नमालिकायां साहस्रिकायां या-
दा सुगुरुवरः सम्यक् कथयेत्तदसंशयं मुक्तस्तत्रैव काले सो यद्यपि वत्के वलवसेत् इति श्रीनिशाटनेऽपि
गोर्देहमिथुयाते वा नयनोन्मीलनात्मकं सकृद्गुरुमुखात्तत्वं सम्यक्तो मोचयेत्परान् यस्मात्सर्वपरेभ्यस्तो
येनात्मा ब्रह्मणि ज्ञातः स्मरणं तु कथं तस्य प्राणांते समुपस्थिते इति अथवा आत्मविदः पर्यंतक्षणः स्वा-

प॰ सा॰ ७९

नुभवैकसाक्षीकेनानुभूयते यद्दशान्तस्य स्मरणमस्मरणं वा परिकल्प्यते ॥ यावता तत्र सर्वाऽऽदृशां नास्ति
गोचरः इति सर्वज्ञस्तत्र प्रष्टव्यः न पुनः शरीरचेष्टामात्रात्स्मरणावसरे ऽधिगतपरमार्थस्यापि देहत्यागलक्षणः
शुभाशुभभावेनानुमातुं शक्यः तस्मात्स्वरूपमेव सदा तद्भावभावितं स्वात्मज्ञानविदं स्यात्तस्य एव परमेश्वरो
मरणावसरे स्वस्वरूपं काष्ठपाषाणतुल्यमपि स्मारयति यदुक्तं स्वस्थचेष्टासु ये मत्स्मां स्मरंति मम नारद
काष्ठपाषाणतुल्यांस्तानंतकाले स्मराम्यहं तथा स्थिरे चेतसि स्वस्थे शरीरे सति यो नरः धातुसाम्ये
स्थिते स्मर्ता विश्वरूपं च मामजं ततस्तं म्रियमाणं तं काष्ठपाषाणसन्निभं अहं स्मरामि मद्भक्तं नयामि परमां
गतिमिति भगवता लक्ष्मीसंहितायामुक्तं एवमत्र सदा तद्भावभावितत्वमेव हेतुः अन्यथा पूर्वानुभ
वसंस्कारदार्ढ्यं विना कथमंते स्मृतिरपि स्यादिति न केनचिदपि ज्ञानिनो मरणावसरे समुपयोग इति ॥
यदि पुनस्तीर्थयात्राश्रयणमुक्तप्रकारेण न कश्चिदप्युपयोगमावहतीति तर्हि किमिति विद्वद्भिस्तत्समाश्री
यत इति विषयविभागमाह पुण्यायतीर्थसेवा निरयाय श्वपचसदननिधनगतिः पुण्यापुण्यकलं
कस्यशुभावितं किं तेन ॥७॥ येषां विदुषामपि देहादिष्वनात्मताग्रहः सांप्रतं न विगलितः स्वात्मज्ञान
चर्यायां च न तथा समभ्यासः तेषामिष्टापूर्तादिधर्मसंग्रहं कुर्वतामधर्मसंग्रहं वा प्रयागादितीर्थसे

दोषं

७९

तीर्थः

वामरणावसरे देवेऽपि परिग्रहः पुण्यपापयोरनमलोकप्राप्त्यैव निश्चितं तस्मादेव तत्रैव श्वपचसदननिधनगतिः श्व
पाकादिगृहेऽप्युपलब्धेति पापीयसि स्थाने निधनगतिः प्रमयप्राप्तिः निरयाय अवीच्यादिनरकपाताय
एतेषां किमितिनिमित्तं भवेद्देहप्रमातृतायाः हस्य विद्यमानत्वात् मरणस्थानानुगुणं भोगमपि भुङ्क्ते शुभाशु
भेषु देहेषु जायन्ते पुनर्म्रियन्ते चेत्यनवरतं जन्ममरणप्रबन्धाः देहाद्यात्ममानिनः स्वात्मज्ञानप्रत्यव
मर्शदार्ढ्याद्देहादिप्रमातृताभिमानेन निःशेषेण विगलिते तस्य चिन्नभः स्वभावं वा संस्पर्शप्रवृत्तये दे
हे सति किं तेन एवं संयतः शुभाशुभकर्मभाजां तीर्थादिपरिग्रहः तत्र तेन तीर्थसेवादिना विमलस्य
ज्ञानिनो नास्त्युपयोगः यदुक्तं मानवे धर्मशास्त्रे यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः तेन चेदवि
वादस्ते मा गङ्गां मा कुरून् गमः इति अत्र देहात्ममानिनि ते देहहृदयवर्तिनीयमः सोऽपि पूर्णस्वात्ममहेश्वरस्व
भावमुपलभ्य संभवितानां तेषां कथमेष तीर्थसेवाप्रयासः इति सिद्धान्तः ८७ ननु प्राक्तनपादितयथा
ज्ञानदग्धेऽपि आणवमायीयकार्ममलस्वरूपया आत्मापिण्डात्मत्वस्वरूपस्यापूर्व नष्टपुनर्भवप्ररोहं विधत्ते दग्ध
बीजमिवाङ्कुरमिति स्वात्मज्ञानाविर्भावसमकालं देहकञ्चुकभङ्गश्चेत् तर्हि तत्क्रमाविधेता यत्पुनर्वि
द्यमाने देहादिकञ्चुकबन्धे कथं कारं सततं ज्ञातधर्मानुकारितो न स्यात्तदाक्षुरितः कथं न संसारीति चोद्यम

एवमप्रवंशप्रायाः यम पुनः

स्वधर्माधर्म

स्व

स्व

भवप्ररोहं

सन्मृतः

प. सा. ५२

प्रवदति । तुषकंचुकात्पृथक्कृततंडुलकणं तुषदलांतरक्षेपः तंडुलकणस्य क्रियते न पुनस्तद्रूपता तादात्म्यं तद्वत्कंचुकपटलीपृथक्कृता संविदत्र संस्कारात् तिष्ठंत्यपि मुक्तात्मा तत्स्पर्शविवर्जिता भवति ९६ तुषकंचुकाभ्यां तद्वत्पृथक्कृतौ विश्लिष्टौ यस्तंडुलकणस्तस्य यस्तुषदलांतरक्षेपः प्रागिव पुनस्तत्रैव विन्यासः स यथा तुषदलांतरप्रक्षेपः तंडुलकणस्य तद्रूपतया अंकुरजननक्षमत्वेन स्थितोपि तादात्म्यगाढावष्टंभं न कुरुते अयःशलाकावच्छिन्नावेव तुषतंडुलौ तिष्ठतो न पुनरेककार्यजननक्षमौ भवतः तद्वत्तथैव ज्ञानिनः स्वयं संवित् चेतना कंचुकपटलात् आणवमलादिकंचुकसमूहात्पृथक्कृता अहमेव स्वात्ममहेश्वरस्वभावो विश्वात्मना सर्वदा सर्वत्र स्फुरामीति स्वात्मज्ञानपरिशीलनदार्ढ्यात्तत्समुद्धृता अत्रेति अस्याः कंचुकपटल्याः कंचुकपटल्यां केचित्कालं शेषवर्तनया देहभावेन तिष्ठंत्यपि स्थिता सती विमुक्तात्माथ स्तब्धा तत्स्पर्शविवर्जिता भवति तस्माद्देहादिकंचुकपटल्याः स्पर्शः पुण्यापुण्यरूपः कार्ममलोपजनितो य उपरागः संसारांकुरजननक्षमस्तेन विवर्जिता परिहृता संपद्यते यथा तुषदलांतरे क्षिप्तस्तंडुलकः अंकुरप्ररोहस्पर्शरहितो भवति इदमुक्तं स्यात् अज्ञानकारणकत्वात्संसारः तत्र समुदितस्वात्मज्ञानदालितकंचुकस्य योगिनः संसारहेतुरज्ञानजनितसामग्रीविकल्पात् नापि तस्य शेषवर्तनया संस्कारवशी

५२

संविन्नु पुनः ९६

नतिष्ठन् अयंदेहकंचुकबंधोज्ञानाग्निदग्धाज्ञानमूलः स्वगतात्माभिमानेन संसारप्ररोहंदात्वमल
मिति ज्ञानीजीवन्नेवशरीयत्रूपोदेहाभावात्तुर्यातीतत्रूपइत्युभयथापुनर्नकाचित्संसारशंकेति ८६
नत्वशेषवर्तनयायावच्छरीरावस्थितेर्योगिसंवेदनमधिगतस्वस्वरूपमपिदेहोपाधिकृतमालिन्यस्या
पितावदंशेनविद्यमानत्वादस्पष्टमेवेतिदृष्टांतेनपरिहरति उत्थालितमपिशिल्पिकल्पितविमलीभा
वःसम्पृक्तकोपाधेः मलिनोपिमणिरुपाधेर्विच्छेदेस्वच्छपरमार्थः ८७ एवंसद्गुरुशासनविमलस्थि
तिसंवेदनंतद्रूपाधेः मुक्तस्तूपाध्यंतरस्पृन्यमवभातिशिवस्वरूपं ८८ ॥ यथामणिरतिप्रवीणवैकटि
कसंस्कृतोपिततोनिर्मलःसन् सम्पृक्तकविशिष्टत्वान्मलिनोपिस्फुरत्प्रायोपिभवति सएवपुनःसम्पृक्त
कोपाधिविच्छेदेप्रावरणविशेषाभावेस्वच्छपरमार्थः यथावन्निर्मलस्वरूपःसंपद्यते एवमनेनैवप्र
कारेणइदंसंवेदनं सद्गुरुशासनविमलस्थितिपरिपूर्णः स्वात्मज्ञानविद्योदेशिकप्रवरस्तस्ययच्छा
सनंस्वात्मज्ञानरहस्यस्तवाम्नायस्तस्यपरिशीलनेनविगतकालिकारूपस्याणवमलस्यमायीयका
नृ॰ र्ममलभित्तिभूतस्यस्थितिर्यस्यतदेवंविधंमौलिकमलप्रत्ययान्नभोद्रूपमपिसंवेदनंतद्रूपाधेः तत्व
शरीरेतल्लक्षणउपाधिर्विशेषणंततोमुक्तंपृथक्कृतंविशेषणांतराभावाच्छिवस्वरूपमाभात्येव दे
हभंगात्परमशिवत्वेनभासतेइतियावत् यथासम्पृक्तकोपाधिविरहात्मणिःस्वस्वरूपोभाति त

पार्थेर्मुक्तौ

प॰ ४२

थैव स्वस्वरूपावबोधाद्विमलमपि अशुद्धाभिमतं शारीरोपाधित्वाद्विशुद्धमेव संवेदनं भासते ॥ ननु मणिर्य
था स्वच्छकोऽपि पुनरल्पतैलोपाधिपरिग्रहात्समलः संपद्यते तथैव तनूपाधेः शुद्धमपि संवेदनं मणिवदुपा
ध्यंतरसंश्लेषाद्ग्लानिं तर्हि पुनरपि सोपाधित्वादशुद्धमेवेति परिहरति ॥ उपाध्यंतरस्पर्शोऽप्यसीति नहि ध्वांतदार्ष्टांति
कयोः सर्वथा साम्यं यतः पिंडपातात्तस्य महाप्रकाशावपुषः परमात्मस्वरूपस्य सर्वमिदमुपाध्यभिमतं स्वां
गकल्पं भासते ॥ अतो व्यतिरिक्तस्योपाध्यंतरस्याभावान्न पुनस्तदुपाध्यंतरेण विशिष्यतेऽस्ति न मणिनोपाधि
ग्रहणस्य साम्यं अज्ञानमूलं किल शारीरोपाधिग्रहणं तच्चेत्स्वात्मज्ञानकुठारेण दलितं कथंकारं पुनरुपा
धिसंश्रयो भवेत् यथोक्तं अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परमिति गीतासु तस्मात्स्वस्वरूपज्ञानाद्योगिनः स्वसंवेदनं सदैव शु
द्धमेवेति ८८ ॥ सर्वोपाधिशून्यत्वात्सो यथावत्परिशीलितव्यापारस्य मनःसंस्कारस्य प्रवृत्तिरेव निमित्तं न पुनर्देह
नत्वेन किमप्यायातीत्यावेदयति ॥ मूलं ॥ आम्नायादिप्रामाण्यादविचलितश्रद्धयार्पितस्य यतो प्राणः स्वप
वर्गं स्वर्गनरकं मनुष्यत्वं ८९ ॥ आगमप्रामाण्यात्तत्स्वरूपदेशायास्वपर्यंककथनाद्युक्तिपरिशीलनाद्व्यासा
सनाप्रवृद्धया श्रद्धया स्वात्मज्ञाने दृष्टादृष्टे शापाप्रविकर्मणि वा कर्तव्यासः प्रमाता तांदैवतत्संस्कारप्र
रोहेण तन्मयतां तत्तदभ्यस्तवस्तुस्वरूपतां प्राप्तः सन्नुत्तरत्र देहपाताद्वासनानुरूपेण स्वर्गनिरतिशायो

म॰

सर्वेज न्मवासना
उ
४२

वा॰

सप

प्रीतिं नरकमवीच्यादिदुःखं मनुष्यत्वं सुखदुःखोभयरूपं मनुष्यभावं प्राप्नोति नपुनरनभ्यस्तवासनस्या
पि पुरुषस्य देहपातादेव यत्किंचिदापतति यतः सर्वः प्रमाता येनाशयेन यदभ्यस्यति तदेव सततरूपो भव
ति किंतु मरणसमये स्फुटतया यदभिलषितं वस्तु तत्प्रमातुरभिव्यक्तिं यातीति नाभ्यस्तवस्तुनः कदा
चिद्विपर्ययः स्यात् नाप्यनभ्यस्तवस्तुस्वरूपं किंचिदपूर्वत्वेनापतेदिति सर्वत्र पूर्वाभ्यास एव कारणमिति भावः
एवं सदा तद्भावभावितत्वं स्वात्मविदो देहत्यागावसरे पूर्णप्रथाहेतुः नपुनर्लौकिकपरिदृष्टः पुण्यापुण्य
रूपो मरणावसरः कश्चित्स्वर्गनिरयादिकारणं परिकल्पनीयमित्याह ७ अन्त्यः क्षणस्तु तस्मिन्पुण्याया
पां च वास्थितिं बुध्यन् मूढानां सहकारीभावं गच्छति गतौ तु न स हेतुः ८ येपि तदात्मत्वेन विदुः पशु
पक्षिसरीसृपादयः स्वगतिं तेपि पुरातनसंबोधसंस्कृतास्तां गतिं यान्ति ९ । एवं प्रतिपादितं ज्ञानिनि
अन्त्यः क्षणः चरमो देहविनाशसहभावी कालः यातु दोषवशेन दुष्टव्याध्यनुभावाद्वा समीपस्थैः प्रमा
तृभिर्दुर्मितां पुण्यां पापमयीं वा स्थितिं बुध्यन् सेव्यमानः सन् मूढानां देहात्ममानिनां प्रमातॄणामेव
सहकारीभावं कारणत्वं गच्छति गच्छतु वराकः नैतावता निर्भग्नदेहात्ममानित्वैः सदा स्वात्ममहेश्वरनि
भालनचतुरैः तस्मिन्योगिनि सोन्त्यः क्षणो गतौ देहाद्यहंतात्यागोत्तरप्राप्यमोक्षहेतुः कारणं भवेत् ॥ कुत एतदाग
तमिति निदर्शयन्नाह येपीति येपि केनाप्यासाध्यवशेन प्राणापादिना वा पापयोनयः पशुरूपतामपि

तीर्थादौ चण्डालादिगृहे

२८

२८

२८

ग्रा

वदर्ह

प॰ वि ४४

प्राप्तः स्वगतिमात्मस्थितिं मरणावसरे आत्मत्वेन जानीयुः ते मूढाः संतोपि अग्रमभ्यस्तस्वात्मज्ञानवासनानुगृ
हीताः स्वात्मस्थितिं च लभंते गजेंद्रमोक्षणादौ यथा हस्तिजातप्यस्वभावेनापि सतताभ्यासपरिशीलितपरमे
श्वरभक्तिसंस्कारप्रवुद्धेन विस्तुं भगवंतं स्तुत्वा सम्यक् तंतुकं विहाय स्वस्वरूपमवाप्य लब्ध्वा कालत्रस्मरणोहेव
रक्षत् अयं भावः शरीरादिघुत्यधातुदोषवशात्कांक्ष्यापाशात्चेष्टोज्ञानी पुरुषपापमलालविद्युलादिकं वा
यत्किंचित्प्रलपन्देहं त्यजति नैतावता स्वस्थचेष्टादिदम्भस्तत्स्नानादिकं तस्य विलोपः स्यात् शरीरादिगा
तावधर्माः शरीरादावेव निपतंति नपुनः सदाभावितं वस्तु स्वस्यगाधितं प्रभवतीति आमरणात्कारणं सर्वत्र
प्रवृत्तिरेव परमार्थः यथा गीतासूक्तं यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरं तं तमेवेति कौंतेय सदा तद्भा
वभावितः तथा तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयांति ते इति भा
वितांतःकरणेनैव पर्यंतगति दानहेतुः ९१ एवं दर्शितदृष्टा यतः सदा तद्भावभावित्वमपहृत्य नूतन
त्वेन शरीरविनाशेन नापूर्वं किंचित्समापतेज्ञानिनः यतो देह एव विनाशी केवलं स एव विनश्यति नपुन
र्वासनाप्ररोहइति दर्शयन्नाह ॥ स्वर्गमयो निरयमयस्तदयं देहांतरालगः पुरुषः तद्भोगेनोचितादे
हांतरयोगमभ्येति ९२ एवं ज्ञानावसरे स्वात्मा सकृदस्य यादृग्विभातः तादृश एव तदासौ न देहयाम
नैन्यथा भवति ९३ तत्स्माच्छरीरघटादिनिविष्टः पुरुषः सर्वस्य कार्ममलाधिवासित आत्मा स्वर्गाद्यपि

तत्त्वभावहे । तत्त्वभावसत्य
तदिति ॥

नष्ट

सर्वस्मिन्काले

नष्टपतिः

उ ४४

प्राग्पूर्वकृतकर्मफलवासनावासितांतःकरणः स्वर्गमयः प्रवृत्तस्वर्गवासनाविशिष्टत्वात्स्वर्गफलभोक्तेति
यावत् एवं दुष्कृतपूर्वकर्मवासनाप्रवृत्तो नरकभोक्ता केवलं देहद्वयं यत्कर्मफलभोगायतनं तद्वियोगेऽपि चि-
न्त्यादिति तस्मिन्देहद्वये स्वस्यात्मनो यथाहि तद्वासनानुगुण्यादन्येन भोगायतनेन शरीरांतरेण सम-
न्तरसंबंधमुपयाति उत्तरकालं येन विशिष्टकर्मवासनादत्तफलभोगभागी भवति तथैव ज्ञानावसरे
उपदेष्टुपरगुरूपदिष्टस्वात्मप्रकाशनकाले स्वात्मचैतन्यं सकृदेकवारं यादृक् यादृशो विभातः उपदेशाक्र-
मानुसारेण परिपूर्णस्वातंत्र्यलक्षणं मितं वा परामर्शदशागतः तदृश एव सदासौ येनैव स्वरूपेण ज्ञानि-
ना स्वात्मा सर्वकालं परामृष्टः तद्रूप्येण वासनाप्ररोहात्तस्य प्रथते न पुनर्देहपातेऽप्यकाशितोऽपि स्वात्मज्ञा-
निनोऽन्यथा समाकांक्षादितो भवति नहि भातमभातं स्यात् अपरथा न कश्चित् किंचित् स्यादिति सर्वव्यव-
हारविप्रलोपो भवेत् धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ज्ञानेन चापवर्गो विपर्ययादिष्यते
बंध इत्यादि सर्वं चानुद्योतं तस्मान्मरणकाले शरीरं यथास्तु तथा भवत्वधर्मेण ज्ञानेन चापवर्गो विपर्य-
यादिष्यते बंध इत्यादि विशिष्टं केवलं वासनाप्ररोहः स्वात्मगतः सर्वस्य बंधमोक्षे च हेतुरिति एतत् ^ यदि
न धर्मविशेषस्याद्धूरीरमरणव्यथोपलब्धिः स्यान्नैतावतात्मस्थितिमुपलब्धुं परिघटयते ॥ करणगण

^ध्यासप्ररोहे का चिन्ता तिरस्यावेदिता^

प॰
मा
४५

वागादिकोर्मे
न्द्रियाण्यप्येवंव
चनादीनप्रवर्त्तन्ते

45

संप्रमोषः स्मृतिनाशः श्वासकलिलमाछेदः मर्मछरुजाविशेषैः शारीरसंस्काररुजोभोगः ९४ सकथंचिवि
ग्रहयोगे स्मृतिनभवेत्तेनमोहयोगेपि मरणावसरेज्ञानीनच्यवते स्वात्मपरमार्थात् ९५ करणगणस्यवा
ह्यंतर्गतस्य त्रयोदशात्मकस्यसम्यक्प्रमोषः स्वरूपविप्रलोपः यथाचक्षुरादीनींद्रियाणि रूपादिविष
यालोचनायां नप्रगल्भंते नापिबुद्धिर्यथार्थमर्थमध्यवस्यति मनः सोनवस्थितिः अहंकारोपिमध्येम
ध्ये संस्कारस्तथास्ते तथा स्मृतिनाशः अनुभूतविषयस्यसंप्रमोषः बंधुभिरर्थ्यमानोपि मुमूर्षुः पुरोवस्थितं
वस्तु शतशोनुभूतमपिनप्रत्यभिजानाति अतएवसदातद्भावभावितंविनाब्रह्मविद्यादिकंध्यानमंतकाले
ध्यानमन्यत्किंचिद्वातस्पर्णस्थायांनभसिचित्रमिवनचित्तेप्ररोहति किंतत्तदितिकर्तव्यतामात्रंकार्यमितिनि
योगः तथा श्वासः कोष्ठो वायुस्तस्य कलिलता कंठदेशे गद्गदिका हिक्का वा अन्यच्च मर्मच्छेदः अस्थि
संधित्रोटः तथा रुजाविशेषः ज्वरातीसारप्रभृतयः दृष्टिबंधः शारीरस्य भूतकंचुकस्य वातपित्तश्लेष्मधा
तुवैषम्यात् शरीरसंस्काररुजोभोगः देहजोडः स्वानुभवः सकथंकेनप्रकारेण विग्रहयोगे स्मृतिज्ञानिनोन
भवेत्स्यादेव तेनहेतुना ज्ञानी सदाधस्पदीकृतदेहाद्यभिमानः समाविष्टस्वात्ममहेश्वरभावश्च मरण
त्राणजनितशारीरज्ञानसंबंधेपि स्वात्मप्रद्ध्वेतन्यप्रत्यवमर्शमतत्त्वान्नच्यवते नान्यथाभावं याति य

उ
४५

परमार्थात्

स्वस्थ स्वसमीपस्थः

स्यतन्त्रदायीभवे[illegible]इति श्रीतथाः प्रतिपादितम् य स्तु सदा देहात्ममानी स तेप पापमयः स कथं देहसंस्कारो॥ स

तोसौज्ञानीत्यक्तुं तद्देहसंबंधोनतज्जेनभोगेनतन्मयीकर्तुंपार्यते केवलंलोकसंग्रहेच्छुरीरयात समनंतरंहूणानो
पलभ्यते इत्येतावत्तस्याशुस्तहृदयस्यसंकल्पिताभिप्रायेणस्वस्थचेष्टतयाप्युत्तभगवद्भक्तोनेकिंचिद
पूर्वसमापततीति तस्माज्ज्ञानीस्वात्मप्रथासमनंतरमेवमुक्तः नशरीरसंस्कारोऽङ्गतरत्नखड्गःस्वादिभोगजनि
तंतन्मयत्वंनायाति यदुक्तं यदासत्वेप्रवृद्धेतुप्रलयंयातिदेहभृत् तदोत्तमविदांल्लोकानमलान्प्रतिप
द्यतेइत्यादि सत्वादयोगुणाःप्रकृतिधर्मास्तन्मयस्यैवनियंत्रणाविदध्यते येपुनस्तत्तोविविक्ततयाप

प्रत्ताः श्रात्मनः

विपश्चितःनतंप्रत्येतेकेचनेति ज्ञानिनोप्येवमपथ्याःयेपुनरदृष्टगुरुचरणाःपशुप्रमातारस्तेस्वगता
न्धर्मानन्यत्रापादयंति यथा यद्ययंज्ञानीस्यात् किमिति व्याध्याद्युपहतशरीरोभूदेतेपरिदध्यातिच
यद्दिवामरणसमयेजाड्यमायातःस्मृतमनेनकिंचिदित्येवंबहुप्रकारमविद्योपहतत्वाद्विवदमानाश्चके
नपर्यनुयुज्यते यद्ययंज्ञानीस्याद्देहधर्मसंस्कारयुक्तःस्यभवेत्किमेतावताचतस्यदुष्टेज्ञानिनः स्वात्मप्र
काशस्तत्तदवस्थाविचित्रोपिस्वात्मप्रकाशएवनपुनस्तस्यस्वात्मानभवितत्तयाविप्रलोपःस्याद्येनज्ञा
नेनवयपेत् पूर्णषाड्गुण्यमहिमापिभगवान्वासुदेवःलीलावतारेव्याधप्रहाराघातजनितक्षयोभूतशरीरंत्य
क्तवानित्येवंकृत्वाकिंतस्यजगत्प्रभोःस्वरूपविप्रयोगोभूदितपाकीटानांदाभिवनाथस्यापिदेहसंस्कारए

लो

प॰ सा॰ ९६

56

ताद्दृशा एव किं त्वेकः स्वात्मप्रत्यवमर्शमात्रसनाथदेहः अपरस्तु देहाद्यात्ममानितासतत्त्व इतीयान्विशे
षः तस्माच्छरीरधर्मैः ज्ञान्यज्ञानिनोः सदृशा एव नैतावता फलसाम्यमित्येतदेव गीतासूक्तं सदृशं चेष्ट
ते स्वस्याः प्रकृतेर्ज्ञानवानपि प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यतीति ९५ इदानीमक्रमेण क्र
मेण च ज्ञानयोगपरिशीलने विचित्रं परशक्तिपातमेव कारणं प्रतिपादयन्फलभेदमाह ॥ परमार्थमा
र्गमेनं झटिति यदा गुरुमुखात्समभ्येति अतितीव्रशक्तिपातात्तदैव निर्विघ्नमेव शिवः ९६ यस्मिन्नेव
काले जनः पश्चिमजन्मा गुरुमुखात्प्रवरदैशिकवक्त्रात् एनं प्रान्तशः प्रतिपादितं परमार्थमार्गं पूर्ण
ख्यातिलक्षणं स्वात्मसंबोधस्वरूपमाम्नायरहस्यं समवगिरः कश्चिदभ्येति समभियाति स तदैव तस्मिन्नेवाव
सरे गुरूपदेशसमनन्तरमेव अनन्तरायं कृत्वा शिव एव स्यात् श्रीकुले यथोक्तं हेलया क्रीडया वापि श्रा
द्धया हार्दतत्त्ववित् यस्य संपादयेद्दृष्टिं सद्यस्तत्क्षणान्म्रियेदिति ननु कथमेवंविधं स्वाम्नायरह
स्यमेवमेवोपनयेदित्याह अतितीव्रशक्तिपातादिति अतिशयेन तीव्रः कर्कशो यो सौ अनुग्रहाख्या
याः पारमेश्वर्याः शक्तेः पातः पशुहृत्कमलावतरणं येन पशुरपि सर्वाम्नायवेदनाच्छिवीभवति जीवन्नेव
मुक्तः इति यावत् यथा ताम्रद्रव्यं सिद्धरसपातात्सुवर्णीभवति अयमर्थः परमेश्वरानुग्रहोपाय एव

पि

उ ९६

स्वात्मज्ञानलाभ इति नात्र नियतिः शक्तिसमावेशं जपध्यानयज्ञादिकमुपायतयाक्रमते अनुग्रहशक्ति
विद्धहृदयस्य तु हठादेव अक्रमेदेवतास्वाम्नायरहस्यहृदयमावर्जयति येन झटित्येव परमेश्वरी
भावं यातीत्यपर्यंतु योऽज्ञैर्विचित्रः परमेश्वरः शक्तिपात इति ९४ यस्य पुनः मध्यमंदमंदतरादिभेदे
न प्रवृत्तः शक्तिपातस्तस्य गुरूपदेशामामरणान्तरणं यावद्योगक्रमेण विमर्शनात् पिंडपातात् शिवत्वस्या
दिति प्रतिपादयति ॥ सर्वोत्तीर्णरूपं सोपानपदक्रमेण संश्रयतः परतत्त्वरूढिलाभे पर्यंते शिवम
यीभावः ९५ ॥ एवं किल शक्तिपातमंदत्वात् स्वरूपज्ञानोपदेशनासादनेन सर्वोत्तीर्णरूपं सर्वतत्त्व
पर्यंतवर्तिस्वभावं संश्रयतः साद्यान्तर्वर्तः कथमित्याह सोपानपदक्रमेणेति कंदनाभिहृत्कंठल
पिकाबिंदुनादशक्तिरूपाणि सोपानानि ऊर्ध्वमाक्रमणाय तीर्थानि विवर्तेषां पदमासादनं तत्र ब्रह्मनादान
रूपः क्रमः शनैः शनैः कंदे ततो नाभौ ततो हृदीति एवमाक्रमणं तेनेत्येवं यावत् परोहोपलब्धो पिंड
पातावसरे योगिनस्तस्य क्रमेण शिवतास्वभावास्थितिर्भवतीत्येषा क्रमयुक्तिः कथिता ९६ ॥ ए
वमपि क्रमयोगाभ्यस्यतो योगिनः समाप्तस्तस्यापि मतस्तथा रूढिर्न स्यादभीष्टप्राप्तौ वांतराये जाय
ते यदि परमनासादितावस्थमरणं स्यात्तदा किंभवेदित्याशंकां परिहरति ॥ तस्य तत्परमार्थमयी

परमार्थ

ग.
गी
४०

47

ऊर्ध्वचित्तक्राधारे
पतितोहंनत्वपर
तोनत्वप्लतोभेदो
मेरतोवेतु भयपाः

धारामगतस्यमध्यविश्रांतेः तत्पदलाभोह्न्कचेतसोपिमरणंकदाचित्स्यात् ३८ योगभ्रष्टःशास्त्रेक
स्थितोसौचित्रभोगभुवनपतिः विश्रांतिस्थानवशाद्भूत्वाजन्मांतरेपिधीभवति ३९ एवमुल्लंघनक्र
मेणयोगमभ्यस्यतःकेनाप्यंतरायेणमध्यविश्रांतेःऊर्ध्वचित्तक्राधारेप्यनुभवोपलब्धेस्तत्रैवपरिशो
षंगतस्यअतएवपरमार्थमयीधारामगतस्यपरतत्वभूमांप्रतिज्ञातादर्शनात्सर्वाधोन्नीसर्मामयाभवतो
यद्विवातत्पदलाभोह्न्कचेतसोपिप्रतिज्ञातपरमार्थसमासादनस्याभिलाषस्यापिकदाचिन्मध्येविश्र
न्तिःसंभाव्यते तदेतस्यालब्धलाभस्यापिपिंडपातात्काकागतिरित्याह योगभ्रष्टइत्यादि प्रयोगात्स
माधेरूर्ध्वंयथाभ्रष्टस्खलितःशास्त्रेआगमग्रंथेकथितःउक्तःकीदृग्भवेदित्याह चित्रेत्यादिपिंडपा-
तादितिदेवंचित्रभोगानि नानाश्चर्यरत्नान्नपानमाल्यवस्त्रानुलेपनगीतवाद्यादिप्रधानानियानि
भुवनानितस्यविश्रांत्यनुगुणानितद्विस्तरस्थानानितत्पतिरीश्वरोभवति मरणसमनंतरमेवदिव्यैर्भो
गैर्युज्यतेइतियावत् तद्भोगाधिकारपरिक्षयेपुनरपिसयोगभ्रष्टःकथंस्यादित्याह विश्रांतीत्यादि
विश्रांतिस्थानस्यकन्यादेःप्रदेशस्यवशात्तदभ्याससंस्कारप्रबोधसामर्थ्यात् जन्मांतरेद्वितीयेजन्म
निभूत्वासंसारेधिकारिशरीरेयोगाभ्यासयोगंप्राप्य पूर्वाभ्यस्तेयोगमप्रयासेनस्वीकृत्यहेलयाप

[illegible]
४०

रमार्थमर्थीमात्रज्ञप्रतिज्ञातां दयामधिरुह्य पिंडपातात्किं च एवं भवति ९९ अथाभ्यसतो पि योगं यो
गिनो मनश्चांचल्यात्साद्गिश्रांतिमेकदेशोपि मनागप्यलभमानस्य योगं प्रति श्रद्धावतस्तु पिंडपातात्का गा
तिः स्यादित्याह परमार्थमार्गमिनं ह्यभ्यस्य प्राप्य योगमपि नाम स्वर्लोकभोगभागी मुदितमना मोदते
सुचिरं १० विषयेषु सार्वभौमः सर्वजनैः पूज्यते यथा राजा भुवनेषु सर्वदेवैर्योगभ्रष्टस्तथा पूज्यः १८
एनमिति पाठान्तरे प्रतिपादितस्यात्मज्ञानमतत्वं पंथानमभ्यस्य श्रद्धाभक्तिभ्यां सेवित्वापि चित्तदोषात्
दुरवस्थानेन यथावद्योगलक्षणात्पविश्रांतिं जन्ममध्ये प्यनधिगतः सन् मृतश्चेत्तदा स योगभ्रष्टो ज्ञान
योगविषयप्रवृत्तश्रद्धाभक्तिप्रसादस्समर्थेन देवलोकभोगभागी साह्लादचित्तः सुचिरं कालं हर्षं प्र
याति स्वैरपि भुवनेषु निजाभिजनस्थाने पूज्यो भवति कइवेत्याह सार्वेत्यादि यथा सार्वभौमो राजा
सप्तद्वीपेश्वरो राजा चक्रवर्ती विषयेषु नानामंडलेषु सर्वजनैः पूज्यते समभ्यर्च्यते तथैवायं प्रत्तीय
पुण्यापुण्यविषयः सञ्जातत्वेद्वैराग्यः पश्चिमजन्मावेशोस्माकं यस्य स्वात्मनिजिज्ञासार्थं प्राज्ञत्वमनु
घमोभूदिति स्वैरपि पूज्यते इति यावत् १८ तस्य लोकांतरभोगाधिनिवृत्तेरनंतरं किं स्यादित्याह
महता कालेन पुनर्मानुष्यं प्राप्य योगमभ्यस्य प्राप्नोति दिव्यमस्तं यस्मादावर्तते न पुनः १२ देव

कार

प. सा. ४८

48

लोकेषु यथानिर्दिष्टेषु भोगान्भुंक्त्वा अतिदीर्घेण कालेन स योगभ्रष्टः संसारेस्मिन्नवश्यभावमागत्य
योगाभ्यासस्साधनयोग्यंशरीरमासाद्य प्राक्तनकृतिमनस्थां चल्याद्यो योगोऽभ्यापोभूत् तमेव योगं
प्राज्ञातभक्तिश्रद्धास्तरूढयोगवासनासंस्कारप्रबोधवृद्धमनायासेन प्राप्य सममभ्यस्यैव देहांते दिव्य
ममृतं परतत्त्वस्वरूपमुपलभते यत्स्वरूपतादार्ढ्यं गच्छतीति यावत् अत एव तस्मात्पुनरावर्तनं
तस्य न स्यादित्येवं महतिकल्याणे स्वात्मज्ञानविषये मनागपि प्रत्यवमर्शः संसारोद्धरणाय भवति
यदुक्तं गीतासु नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयादि
ति अयतिः श्रद्धयोपेतो योगाच्चलितमानसः अप्राप्य योगेत्यादि अप्रज्ञादारभ्य अनेकजन्मसंसिद्धस्त
तो याति परां गतिमित्यन्तपर्यंतेनाप्यर्थोऽनेन प्रतिपादितोपि स्मर्तव्य इति १-२ एवमनेन ज्ञानयोगक्र
मेण जंतोर्मनागपि स्पृहस्य मतइत्यादिविभूतानिशायोयः प्रवन्हो न पार्यते तस्मात्सर्वात्मना विवेकाद्इह।
दृष्टैर्जननमरणनिर्हतोसावधानेर्भाव्यमिति निरूपयति ॥ तस्मात्तन्मार्गेस्मिन्निरतोयः कश्चिदेति।
मपिवत्वं इति मत्वा परमार्थे यथा तथापि प्रयतनीयं १-३ यत एव स्वात्मप्रत्यवमर्शाभ्यासः उत्तम
फललाभः तस्मादेतस्मिन्नशोभने मार्गे प्रकाशमुक्तिप्रापके यस्त्विह यः कश्चिन्निरतः इत्यधिकारिनियमाभा

ग्रं. श्लो. ५

६ ४८

वः ॥ प्रदर्शितः यः कश्चिज्जनो जन्ममरणव्याध्यादिक्लेशाघातपरिपीडितो निरतो विवेकवृद्धान्तिः शोषेण
रतः तत्रैव श्रद्धयानेऽनुभूतानि मग्नः स जन्तुरचिराल्लघुनैव कालेन शिवत्वमेति सकलसंसारिकक्लेशानव
धूय परं श्रेयोऽनुपदशामेकेनैव जन्मनाप्नोति यथा शिवधर्मोत्तरशास्त्रे इहैव भ।वि
कामोद्गतएषतावत्परीत्यतां अनेकभ।विकाद्यन्तिर्भवतो केन वार्यते इति मत्वा एवं विमृश्य तस्मिन्परमा
र्थे यथा तथा येन तेनापि प्रकारेण प्रयतनीयं प्रकर्षेण समन्वयमः कार्यः प्रयाने यत्नः फलवानिति कृ
त्वा परमार्थे मनागप्यवलेपो न विधेयः येन योगाभ्यासेन स्वात्मप्रवृत्तिशेषत्वसत्पन्नासिद्धेनः समीहित म
न चेहिक्वलोकान्तरप्राप्तिः ततोपि प्रत्याहृतस्य प्राक्सम्यक्त्वयोगवासनाप्रबोधबलेन पुनरपि योगसंब
धः इति श्रेयोमार्गपरिशीलनात्र विरुद्धं किञ्चित्कार्यं सम्पादयतीति परमपुरुषार्थसाधनायां मनागप्य
वलेपो न कार्य इति शिवे ९३ एवं शास्त्रकारः श्रीषभट्टास्कोऽन्तं परमार्थसारोपदेशं शिवाद्वयशासन
क्रमेणानुत्तमपत्तुभवागमस्मनाथप्रतिपद्य स्वात्मनः परितोषमात्रार्थितया स्वाभिधानप्रदर्शनपूर्वकमय
मेवोपदेशः परमपुरुषार्थसाधनोपाय इति प्रपयन् ग्रन्थार्थोपसंहारमाह इदमभिनवगुप्तोदितसंक्षे
पं ध्यायतः परं ब्रह्म अचिरादेव शिवत्वं निजहृदयावेशमभ्येति ९४ इदं प्रथमानं विततप्रतिपादितं

नि४२

यत्परंप्रकृष्टंब्रह्मतंद्रष्टृकत्वात्परिपूर्णानंदमयंस्वात्मस्वरूपंध्यायतः अनायासेनस्वात्मनिप्रत्यवमृशतो
जनस्याचिरात् शीघ्रमेवनतुपुनर्बहूनांजन्मनामंतइतितदेवंविधस्यब्रह्मभूतस्यशिवत्वमभ्येतीतिनिः
श्रेयससंप्राप्तिंयाति कथंनिजांहृदयावेशंकृत्वानिजंहृदयंपरामर्शस्थानमाविश्य कीदृशंतद्ब्रह्मकी
दृशीयनाम्नाउदितःप्रकाशितः संक्षेपस्तात्पर्यंयत्रतदेवंविधे अत्रचनाम्नाव्याजेनेदमप्युक्तंस्यात् यथा
अभिनवोयोनैरहस्यः परब्रह्मरहस्यातिशायः गुप्तश्चा[illegible]नरूपावच्छन्नइवाभूत् सएवंविधउदितः
प्रकाशितःसंक्षेपोयत्रतदेवंविधंब्रह्मइत्येवमावेदयतादुर्लभतोपदेशस्यप्रतिपादितास्यात् १०५ ग्रं
थपरिमाणंनिरूपयन्नस्मिन्प्रकरणेकर्तृत्वमाह ॥ आर्याशतेनतदिदंसंक्षिप्तंशास्त्रसारमतिगूढं
अभिनवगुप्तेनमयाशिवचरणस्मरणदीप्तेन १०५ इदंशास्त्रसारंबहूनांग्रंथानांयत्प्रकृष्टंसतत्त्वंत
न्मयाक्षिप्तंग्रन्थसहस्रैरप्युपपादयितुमशक्यं तदेवलघुनाआर्याशतपरिमाणेनस्वीकृत्योक्तमित्य
नेनप्रतिभाकौशलमुक्तंभवेत् कीदृशेनमयाशिवचरणस्मरणदीप्तेनेतिशिवस्यपरश्रेयःस्वभावस्य
स्वात्मस्थस्यचिदानंदैकमूर्तेः यानिचरणानिचिद्रश्मयःतेषांस्मरणंशब्दादिविषयग्रहणकालेनि
भालनं प्रतिक्षणंस्वानुभवाप्रमोषस्तेनदीप्तःपराहंताचमत्कारभास्वरः अतएवकौर्नबीयाभिधानो

अभिनवगुप्तस्तेन

नश्चन्यथा कथं देहाद्यात्ममानिनोऽज्ञातस्यात्ममहेश्वरस्य तत्त्वस्येदृयतिमहार्थोपदेशस्य कर्तृताधिका-
रित्वमुपपद्यते यतो यो यत्स्वभावः स तत्स्वभावं वेत्तुं प्रगल्भते इति उपदेष्टुः सम्यग्विश्वमहेश्वरस्वभा-
वोऽनेन वाक्येनोक्तः स्यादिति शिवं ॥ १०५ ॥ इति श्रीपरमार्थसारटीका संपूर्णा शुभमस्तु शुभे
श्रादृष्टदोषाद्यक्षिकं चिह्नितं मतिविभ्रमात् क्षंतव्यं तद्विपश्चिद्भिर्लिखितं कोऽन विमुह्यति ॥ सं ८५ पौष
शुदि ५ बुदि सोमवासरे ॥ ॥ ॥ ॐ तत्सत्परमशिवाय नमः ॥ ॥ ॥ ॥

इदं पुस्तकं श्रीगोपालराम राज्ञानकस्य प्रकाशराजानकेन प्रीत्यर्थं लिखितं ॥ ॥ शुभमस्तु सर्वजगतां परहितनिरता भवंतु भूतगणाः दोषाः प्रयांतु शांतिं
सर्वत्र सुखीभवंतु लोकाः ॥ ॥ ॥ श्रीमतः क्षेमराजस्य सद्गुर्वाम्नायशालिनः साक्षात्कृतमहेशस्य तस्यान्तेवासिना मया श्रीवितस्ता-
पुरीधाम्ना विरक्तेन तपस्विना विहृतिर्योगनाम्नेयं पूर्णाद्वयमयीकृता ॥ इति श्रीमन्महामाहेश्वराचार्यवर्याभिनवगुप्तविरचितश्रीपरमा-
र्थसारसंग्रहकारिकाविवृतिः तच्छिष्ययोगराजमुनिविरचिता पूर्णाद्वयमयीसंज्ञा विवृतिः संपूर्णा ॥ देहप्राणसुखादिभिः प्रति-
कलं संरुध्यमानो जनः पूर्णानन्दघनामिमां न चिनुते माहेश्वरीं स्वां चितिम् मध्ये बोधसुधाब्धि विश्वमभितस्तत्फेनपिण्डोपमं यः पश्येदुपदेशत-
स्तु कथितः साक्षात्स एकः शिवः ४

५।

ओम् अथातश्चत्वारश्चाश्रमाः षोडशभेदा भवन्ति तत्र ब्रह्मचारिणश्चतुर्विधा भवन्ति गायत्रो ब्राह्मः प्राजापत्यो बृहन्निति य उपनयनादूर्ध्वं त्रिरात्रमक्षारलवणाशी गाय
त्रीमन्त्रपाठी स गायत्रो यो ऽष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत् प्रतिवेदं द्वादश वा यावद्ग्रहणान्तं वा वेदस्य स ब्राह्मः स्वदारनिरत ऋतुकालाभिगामी सदा परदारवर्जी प्रा
जापत्यो ऽथवा चतुर्विंशति वर्षाणि गुरुकुलवासी ब्राह्मो ऽष्टचत्वारिंशद्वर्षवासी वा प्राजापत्य आ प्रयाणाद्गुरोरपरित्यागी नैष्ठिको बृहन्निति १ गृहस्था अपि च
तुर्विधा भवन्ति वार्तावृत्तयः शालीनवृत्तयो यायावरा घोरसंन्यासिकाश्चेति तत्र वार्तावृत्तयः कृषिगोरक्षवाणिज्यमगर्हितमुपयुञ्जानाः शतसंव
त्सराभिः क्रियाभिर्यजन्त आत्मानं प्रार्थयन्ते शालीनवृत्तयो यजन्तो न याजयन्तो ऽधीयाना नाध्यापयन्तो ददतो न प्रतिगृह्णन्तः शतसंवत्सराभिः क्रियाभिर्यजन्त आत्मानं प्रा
र्थयन्ते यायावरा यजन्तो याजयन्तो ऽधीयाना अध्यापयन्तो ददतः प्रतिगृह्णन्तः शतसंवत्सराभिः क्रियाभिर्यजन्त आत्मानं प्रार्थयन्ते घोरसंन्यासिकाः कार्यं कुर्वन्तः प्र

तोत्र

तिदिवसमाहृताभिरद्भिरुपयुञ्जानाः शतसंवत्सराभिः क्रियाभिर्यजन्त आत्मानं प्रार्थयन्ते २ वानप्रस्था अपि चतुर्विधा भवन्ति वैखानसा उदुम्बरा वालखिल्याः फे
नपाश्चेति तत्र वैखानसा अकृष्टपच्यौषधिवनस्पतिभिर्ग्रामबहिष्कृताभिरग्निपरिचरणं कृत्वा पञ्चमहायज्ञक्रियां निर्वर्तयन्त आत्मानं प्रार्थयन्ते उदुम्बराः प्रातरुत्थाय यां
दिशमभिप्रेक्षन्ते तत्राहृतोदुम्बरबदरनीवारश्यामाकैरग्निपरिचरणं कृत्वा पञ्चमहायज्ञक्रियां निर्वर्तयन्त आत्मानं प्रार्थयन्ते वालखिल्या जटाधराश्चीरचर्मवल्कलपरि
वृताः कार्तिक्यां पौर्णमास्यां पुष्पफलमुत्सृजन्तः शेषानष्टौ मासान् वृत्त्युपार्जनं कृत्वाग्निपरिचरणं कृत्वा पञ्चमहायज्ञक्रियां निर्वर्तयन्त आत्मानं प्रार्थयन्ते फेन
पा उन्मत्तकाः शीर्णपर्णाशिनो यत्र तत्र वसन्तो ऽग्निपरिचरणं कृत्वा पञ्चमहायज्ञक्रियां निर्वर्तयन्त आत्मानं प्रार्थयन्ते ३ परिव्राजका अपि चतुर्विधा भवन्ति
कुटीचका बहूदका हंसाः परमहंसाश्चेति तत्र कुटीचकाः स्वपुत्रगृहेषु भिक्षाचर्यं चरन्त आत्मानं प्रार्थयन्ते बहूदकास्त्रिदण्डकमण्डलुशिक्यपवित्रजलपवि
त्रपादुकासनशिखायज्ञोपवीतकौपीनकाषायवेशधारिणः साधुवृत्तेषु ब्राह्मणकुलेषु भैक्षाचर्यं चरन्त आत्मानं प्रार्थयन्ते हंसा एकदण्डधराः शिखाव
र्जिता यज्ञोपवीतधारिणः शिक्यकमण्डलुहस्ता ग्रामैकरात्रवासिनो नगरे तीर्थेषु पञ्चरात्रं वसन्त एकरात्रद्विरात्रकृच्छ्रचान्द्रायणादि चरन्त आत्मानं प्रार्थ
यन्ते परमहंसा नैव दण्डधा मुण्डाः कन्थाकौपीनवाससो ऽव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्तस्त्रिदण्डकमण्डलुशिक्यपवित्रजलपवित्रपात्र
पादुकासनशिखायज्ञोपवीतानां त्यागिनः शून्यागारदेवगृहवासिनो न तेषां धर्मो नाधर्मो न सत्यं नानृतं सर्वसहाः सर्वसमाः समलोष्टाश्मकाञ्चना यथोपपन्नचा
तुर्वर्ण्यं भैक्षचर्यं चरन्त आत्मानं मोक्षयन्त आत्मानं मोक्षयन्त इति चतुर्थः खण्डः ४ इत्यथर्ववेदे आश्रमोपनिषत् शुभमस्तु सर्वेषाम् ॥

वत्सपीत
उन्मत्तकाः
फेनपाः =